# व्यावहारिकसंस्कृतम्

**COURSE CODE: SGB24SN101AC**

Ability Enhancement Course

Sanskrit for FYUG Programmes (Honours)

Self Learning Material




SREENARAYANAGURU OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# व्यावहारिकसंस्कृतम्

Course Code: SGB24SN101AC

Semester - III

## Ability Enhancement Course - Sanskrit
## For Four Year Undergraduate Programmes
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

SREENARAYANAGURU
OPEN UNIVERSITY

# व्यावहारिकसंस्कृतम्

Course Code: SGB24SN101AC
Semester - III
Ability Enhancement Course
For FYUG Programmes


**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K. V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.

**Development of the Content**

Dr. Smitha Sabu, Anju J.

**Review and Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Vijayarajan K.U.
Anju J.
Dr. Jothilekshmi M.
Dr. Sreeja J.,
Chitra Baskar

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

**Director, MDDC :**
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.

Scan this QR Code for reading the SLM on a digital device.

**Edition**
May 2025



**Copyright**
© Sreenarayanaguru Open University



ISBN 978-81-988379-6-7

9 788198 837967



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.


www.sgou.ac.in

YouTube

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. "**व्यावहारिकसंस्कृतम्**" is a foundational Ability Enhancement course in Sanskrit, offered in the third semester of the FYUG programmes. This course is designed to introduce learners to the practical use of Sanskrit in everyday communication. Focusing on simple vocabulary, functional grammar, and commonly used expressions, the course encourages learners to listen, speak, read, and write basic Sanskrit with confidence. The Self-Learning Material has been meticulously crafted, incorporating relevant examples to facilitate better comprehension.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-05-2025

# Contents


Block-1 श्रवणम् 1

Unit-1 वर्णानामुच्चारणम् 2

Unit-2 शब्दसम्पत्तिः 10

Unit-3 कथाश्रवणम् 17

Unit-4 सम्भाषणकार्यशाला-प्रथमा स्तरीया 22

Block 2 प्रसारमाध्यमानां भाषा 28

Unit-1 संस्कृते विज्ञापनचित्राणि 29

Block 3 भाषणम् 37

Unit-1अक्षराणां पदानां च मौखिकाभ्यासः 38

Unit-2 कथाकथनशिक्षणम् 44

Unit-3 वार्तावाचनशिक्षणम् 51

Unit-4 संभाषणशाला-द्वितीया स्तरीया 58

Block 4 सङ्गणकयुगे संस्कृताध्ययनम् 65

Unit-1 प्रत्यह्निकाः संस्कृतानुप्रयोगः 66

Unit-2 सङ्गणकाधारिताःसाम्प्रदायिककोशाः 73

Unit-3 भाषाध्ययने उपयुक्ताः संस्कृतानुप्रयोगाः 79

Unit-4सङ्गणकाधारिताःलेखागाराः 88

ModelQuestionPaper(SET– A) 95

Model Question Paper (SET – B) 97




SGOU

# BLOCK-1

# श्रवणम्

SGOU

# Unit-1

# वर्णानामुच्चारणम्

## उद्देश्यानि (Learning Outcomes)

- संस्कृतम् अनायासेन पठितुं प्रयोक्तुं भाषणाय च शक्तिः (प्रभावः) जायते।
- संस्कृतभाषां श्रोतुं ताल्पर्योत्पादनम्।
- संस्कृतभाषां क्रमशः वक्तुं शक्यते।
- पदार्थज्ञानेन आशयावगतिः जायते ।
- वर्णानामुच्चारणरीतिमवगच्छति।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषायाः विषयस्य वा पठनाय चत्वारि सोपानानि सन्ति। तानि सोपानानि भवन्ति श्रवणं वाचनं भाषणं लेखनं च । भाषापठने प्रथमसोपानस्य श्रवणस्य महत्प्राधान्यं वर्तते। श्रवणं विना भाषां पठितुं न शक्यते। विज्ञानार्जने प्रथमं श्लोकानां गद्यानां वाक्यानां पदानां वा श्रवणं कार्यम्। बालकाः भाषां मातुः पितुः स्वपरिवारादेव प्रथमं पठन्ति। हि मातुः पितुः वा वचनं सः आकर्णयति। एकवारम् आकर्णनेन तच्छब्दं तदा प्रकटितुं केनापि न शक्यते। वारं वारं श्रवणेनैव तच्छब्दं शिशुरुच्चरति। तदानीमर्थबोधः न जायते। श्रवणेन पदं शिशुः ज्ञात्वा मन्दमुच्चरति। तदानीं स्खालित्यं जायते। शिशोः शब्दं माता प्रथमं जानाति। यथार्थतः माता एव शिशोः प्रथमाध्यापिका। शिशोः प्रथमोच्चारणे कदाचित् महान् आशयः च वर्तते। क्रमेण शिशुः भाषणाय यतते। एवं भाषणमारभते। प्रयोगेण भाषणेन च भाषां वशीकर्तुं शक्यते। भाषायै वाक्यानि उपयुज्यते। वाक्येषु पदानि सन्ति। पदेषु अक्षराणि सन्ति। न क्षरति क्षीयते इति वा अक्षरम्। अक्षराणामपरं नाम भवति वर्णाः। वर्णसमुदायः पदम्। वर्णानां स्पष्टतया ज्ञाने उच्चारणे च अर्थावबोधं जायते। वर्णाः तेषामुच्चारणरीतिं च अधिकृत्यात्र पठामः।

## प्रधानांशाः/प्रधानपदानि (Key words)

भाषा-आशयविनिमयाय - वाक्यम्- पदानि- अक्षराणि वर्णाः द्विविधाः- स्वरः- व्यञ्जनं स्वरयोगे व्यञ्जनाक्षरस्य स्पष्टता- उच्चारणस्थानानि कण्ठः- तालुप्रभृतयः– संयुक्ताक्षरम्- उच्चारणे मुखे व्यतियानं- स्पष्टोच्चारणेन आशयः- पदपदार्थयोः बन्धः- उच्चारणपाठनरीतिः- साहाय्यकोपकरणानि ।

## विशदीकरणम् (Discussion)

भाषा आशयविनिमयाय उपयुज्यते । यद्यपि आङ्ग्यप्रयोगैः, आशगविनिमयं युक्तं तथापि भाषया सुकरया रीत्या आशयं विनिमयं कर्तुं शक्यते | आशयानां विचाराणां च विनिमयाय भाषा उपकरोति । केवलं मानवाः एव आशयविनिमयाय भाषा उपयुज्यते। पशूनां पक्षीणां च चलनानि स्वराणि च आशययुक्ताः भवन्ति इत्याधुनिकशास्त्रमुदघोषयति । तथापि मनुष्यैः साधारणतया उपयुक्तवत् स्पष्टतां व्यक्ततां वा तेषु चलनेषु स्वरेषु वर्तते वा ?

का नाम भाषा ? भाषते इति भाषा । 'भाष व्यक्तायां वाचि' इति धातोः निष्पन्नं रूपं भवति भाषा । यां व्यक्ततया उच्चार्यते सा भाषा। एकस्मिन् समूहे वर्तमानाः जनाः आशयविनिमयाय उपयुज्यमानां स्पष्टोच्चारणेन युक्तां श्रोतॄणां मनसि समानाशयप्रतीतिजनको शब्दरूपाण्येव भाषा।

जन्मना न कोऽपि भाषां जानाति । यः निरन्तरं समानं शब्दमाकर्ण्यति, क्रमेण तेन शब्देन साकं परिचितः भूत्वा यमाशयमुद्दिश्य अयं शब्दः प्रयुक्तः इति जानाति । अतः पदस्य पदार्थस्य च बन्धमवगच्छति । शब्दं शब्देनोद्दिष्टं पदार्थं च जानाति । क्रमेण अनेकानि पदानि, तेषां पदार्थान् च गृह्णाति । तस्मिन् समूहे वर्तमानाः जनाः परस्परम् एतादृशपदपदार्थज्ञानसमर्थाः भवन्ति । तत्र काचन भाषा जायते । उत्पत्तिदशायां तस्याः भाषायाः लिपिः नासीत्। तेन समूहेन साकं बन्धाभावाः इतरसमूहे वर्तमानाः जनाः तां भाषां न जानन्ति । व्यत्यस्थसमूहे व्यत्यस्थाः भाषाः जायन्ते । एवं भिन्न-भिन्न भाषाः । कदाचित् केषुचित् कार्येषु तेषां भाषाणां मिथः समानतां यादृच्छिकतया जायन्ते ।

भाषा किञ्चन चिह्नमेव। विविधेष्वसरेषु स्वायत्तमानानां शब्दानां प्रथमतः अर्थबोधं विना आशयं वाचकैः प्रकटयति ।

आङ्गलभाषायां 'बुक्' इति पदं, कैरल्यां पुस्तकमिति, संस्कृते ग्रन्थमिति च नाम्ना व्यवह्रियमाणं पदार्थमेकमेव । एकमेव पदार्थं विविधैः शब्दैः व्यवह्रियते। पदानि शब्दानां चिह्नानि भवन्ति । एकस्यां भाषायां प्रतिपदं सुव्यक्तः शब्दः अर्थः च वर्तते । तत्कार्यं वक्त्रा श्रोत्रा च ज्ञातव्यम् ।

भाषायाः बिम्बानि वाचिकानि भवन्ति। भाषायै आङ्गलभाषायां 'लांग्वेज्' इति पदमुपयुज्यते। पदमिदं लाटिन् भाषातः 'लिन्वा' इति पदादुत्पन्नमेव । लेखनं भाषणस्य रेखाचित्रमेव। कासाञ्चन भाषाणां भाषणरूपमेव, न तु लेखनरूपम् ।

भाषा सांस्कारिकानुभवान् आधारीकृत्य जायमानः कश्चनोत्पन्नः भवति। अनुकरणैः पठनैः च एकस्मात् जनात् अन्यं जनं सम्क्रमते। संक्रमणेन कदाचित् पदानां ईषदीषत् व्यतियानमपि जायेत।

भाषा चलनयुक्ता भवति । अतः भाषायामपि मध्ये मध्ये चलनं प्रोन्नतिः अपचयः वा जायेत। कालानुसारं नूतनानि पदानि भाषायां प्राप्नुवन्ति। कतिपयानां पदानां प्रयोगाभावात् कालान्तरे तानि पदानि अदृष्टानि भविष्यन्ति च ।

भाषायाः विषयस्य वा पठनाय चत्वारि सोपानानि सन्ति। तेषु प्रथमं भवति श्रवणम्। श्रवणं विना भाषां पठितुं न शक्यते । न केवलं भाषा, भाषणमपि श्रवणेन विना न शक्यते । पदसमूहमेव वाक्यम्। वाक्येनैव अर्थसम्पुष्टिः जायते । पदे अक्षराणि सन्ति । न क्षरति क्षीयते इति वा अक्षरम् । एकाक्षराणि वाक्यानि संस्कृते सन्ति। तानि विरलानि।किन्तु प्रत्यक्षरमक्षरबोधः न जायते। कूपः इति पदस्य कश्चनार्थः। अब्धुः इत्यर्थः। अत्र कू इत्यस्य प्रत्येकं न कोऽप्यर्थः। तत् समन्वये अर्थः। अक्षरमित्यर्थे वर्णः इति पदं प्रयुज्यते। वर्णसमुदायः पदम्। वर्णानां स्पष्टतया ज्ञाने उच्चारणे चार्थबोधः जायते।

वर्णाः द्विविधाः । स्वराः व्यञ्जनानि च । स्वराक्षराणि स्पष्टतया उच्चारयितुं शक्यते । अ इ उ ऋ लृ ए ऐ ओ औ इत्येतानि स्वराक्षराणि । प्रत्यक्षरम् उच्चारितुं स्थानं वर्तते । यथा अकारं कण्ठस्थानेन उच्चरति । इकारं तालुस्थानेन उच्चरति । उकारं ओष्ठस्थानेन उच्चरति। ऋकारस्य स्थानं मूर्धा । लृकारं दन्तस्थानेन उच्चरति। एकारस्य ऐकारस्य च स्थानं कण्ठतालु। ओकारं औकारं च कण्ठोष्ठस्थानेन उच्चरति।

व्यञ्जनाक्षराणि ककारादारभ्य 'शषसर् हल् 'इति माहेश्वरसूत्रे हकारपर्यन्ताः । व्यञ्जनाक्षरेषु वर्गाक्षराणि अन्तस्थाः ऊष्माणः चान्तर्भवन्ति । पाणिनिमते पञ्चविंशतिः वर्गाक्षराणि । अन्तःस्थाः चत्वारः । ऊष्माणः च चत्वारः । व्यञ्जनाक्षराणि स्वराक्षराणां साहाय्येन स्पष्टतया उच्चरितुं शक्यते । 'क' इत्यक्षरे 'क्' इति व्यञ्जनाक्षरभागः 'अ' इति स्वराक्षरं च संयोज्य 'क' इत्यायाति । उक्तञ्च पाणिनीये 'हकारादिष्वकार : उच्चारणार्थः इति।

<u>स्थानानि तत्तत्स्थानेषु अन्तर्भूताः वर्णाः च।</u>

कण्ठः - अकुहविसर्जनीयानां कण्ठः - अ क ख ग घ ङ ह :।

तालु - इचुयशानां तालु - इ च छ ज झ ञ य श ।

मूर्धा - ऋटुरषाणां मूर्धा- ऋ ट ठ ड ढ ण र ष ।

दन्ताः - लृतुलसानां दन्ताः- लृ त थ द थ न ल स ।

ओष्ठौ - उपूपध्मानीयानामोष्ठौ-उ प फ ब भ म ...प...फ
(अन्तिमौ द्वौ वर्णौ उपध्मानीयौ)
नासिका - ञ म ङ ण न । ञमङणनानां नासिका च । तत्तद्वर्गेषु वर्तमानस्य अन्तिमवर्णस्य नासिकास्थानमप्यस्ति वर्गान्तरस्य स्थानं च वर्तते । यथा ङ. इत्यस्य कण्ठस्थानेन सह नासिकास्थानमप्यस्त । वर्गान्तरस्य स्थानं च वर्तते । एवं ञकारस्य तालु नासिका च ।
कण्ठतालु - एदैतोः कण्ठतालु - ए. ऐ ।
कण्ठोष्ठम् - ओदौतोः कण्ठोष्ठम् ओ औ ।
दन्तोष्ठम् - वकारस्य दन्तोष्ठम् ।
नासिका अनुस्वारस्य । '<u>o</u>' इत्यस्य अनुनासिका ।

वर्णविकारभेदे सन्धिः । सन्धौ एकस्य वर्णस्य स्थाने सदृशतमः वर्णः आयाति । तदर्थं सावर्ण्यं वर्तितव्यम् । उक्तञ्च 'तुल्यास्यप्रयत्नं सवर्णम्' इति । सावर्ण्यनिर्णये वर्णानां स्थानानि, आभ्यन्तरप्रयत्नः बाह्यप्रयत्नश्च परिगणितव्यानि । उक्तं च 'यत्नो द्विधा । आभ्यन्तरो बाह्यश्च ।' आभ्यन्तरप्रयत्नः पञ्चधा । स्पृष्टः, ईषत्स्पृष्टः, ईषद्विवृतं, विवृतं, संवृतं चेति ।

वर्गाक्षराणां आभ्यन्तरप्रयत्नः स्पृष्टः । ईषद्स्पृष्टम् अन्तःस्थानम् । अन्तःस्थाः य् व् र् ल् च भवन्ति । ईषद्विवृतं ऊष्मणाम् । श् ष् स् ह् एते ऊष्माणः । विवृतं स्वराणाम् ।ह्रस्वस्याकारस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव ।
बाह्यप्रयत्नः एकादशधा । ते विवारः, संवारः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः,अनुदात्तः, स्वरितः चेति ।

व्यञ्जनाक्षराणां स्पष्टतया उच्चारणाय स्वराणां साहाय्यमावश्यकम् । स्पष्टतया उच्चरिति चेत् पदबोधः जायते, ततः पदार्थबोधः, पदानामर्थबोधे वाक्यबोधः । एवमाशयावगतिः ।

वर्णानामुच्चारणं स्पष्टतया कार्यम् । तदर्थं प्रथमं वर्णबोधः कार्यः । उच्चारणाय काश्चन रीतयः सान्ति ।

### 1.1.उच्चारणरीतयः (Manner of articulation)

उच्चारणारीतयः पाणिनीयानुसारं भवन्ति । तथापि केचन भेदाः सन्ति । पञ्च रीतयः ।

#### 1. स्थानानुसारम् (Place of articulation)

| स्थानानि | उदाहरणम् | आङ्गलभाषायाम् |
|---|---|---|
| कण्ठः | क | Velar. |

| | | |
|---|---|---|
| तालु | च | Palatal. |
| मूर्धा | ट | Retroflex |
| दन्ताः | प | Dental |
| औष्ठौ | त | Labial |

**2. प्रयत्नानुसारम् (According to effort)**

क) उत्कृष्टः (High effort)

ख) मध्यमः (Medium effort)

ग) अल्पः (Low effort)

**3. सर्गानुसारम् (Secondary articulation)**

1.अनुनासिकः (Nasalization) मुखनासिकावचनोऽनुनासिकः,उदा - म

2.श्वासः(Aspiration) - खर् प्रत्याहारः। खफछठथ चटत कप शषस । उदा - ख

3. स्वरः (voicing) उदा - त

**4. क्रियानुसारम् (Action)**

क्रियानुसारं चतुर्धा विभक्तमस्ति।

1. निषेधः - Complete closure.
2. संवेष्टनम् - Narrow constriction
3. सम्प्रसारणम्- wide constriction
4. अगस्त्याद्वानम् - clicks.

**5. स्फुरणानुसारम् (According to Dunation)**

मात्रानुसारमुच्चारणं क्रियते।

ह्रस्वः - short - अ - एकमात्रिकः

दीर्घः - Long - आ - द्विमात्रिकः ।

प्लुतः - Overlong - अ३ - त्रिमात्रिकः ।

सूचना- ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रम् ।

अ३ अक्षरोपरिभागे ३ लिख्यन्ति चेत् तद् प्लुतसूचकमेव ।

वर्णान् परिचाय्य द्व्यक्षरपदानि, त्र्यक्षरपदानि, चतुरक्षरपदानि, संयुक्ताक्षरयुक्तपदानि च यथाक्रमं पठित्वा उच्चारणे पर्याप्तं परिशीलनं कार्यम्। एकाक्षरयुक्तानां निपातानां (चादीनां) वा वाचनमपि साहाय्यकमेव।

| निपाताः | द्व्यक्षराणि | त्र्यक्षराणि | चतुरक्षराणि | संयुक्ताक्षरयुक्तानि पदानि |
|---|---|---|---|---|
| च | माता | आकुलः | कारुणिकः | अक्षि |
| वा | पिता | विमुखः | कालीयकं | स्वसा |
| उत | मुखं | नयनं | नारायणः | क्रीडति |
| अपि | वनं | अटवी | कुतूहलं | उच्चारणं |
| अभि | वाति | आकाशम् | कुमारकः | आक्रोशनं |

अक्षराणां वाचनानन्तरं पदानि छात्रेभ्यः श्रोतुमवसरः देयः । तदर्थं च चा चि ची.. इत्येवं रूपेण व्यञ्जनाक्षरेण साकं स्वरचिह्नानि प्रयुज्य परिशीलनं देयम् । पुनः च वा उत अपि अभि इत्यादीनां वाचनं कार्यम् । अनुवाचनाय प्रेरणा देया। अनुवाचने स्वालित्यं जायते चेत् स्वालिनिवारणं कार्यम्। सरलात् कठिनं प्रति इति पाठनतत्वं स्वीकर्तव्यम्।

पुनः माता, पिता, मुखमित्यादीनि पदानि । पुनः आकुलः, विमुखः नयनं, अटवी इत्यादीनि पदानि । एवं चतुरक्षराणि पदानि। पुनः संयुताक्षरयुक्तानां पदानां वाचनम् अनुवाचनं च कार्यम्। एवं क्रमेण वर्णानामुच्चारणेन साकं पदस्वाधीनतां च वर्धयितुं शक्यते। उच्चारणसाहाय्यकरूपेण कानिचन साहाय्यकोपकरणानि प्रयोक्तुं शक्यते । तेषु अन्यतमं भवति दर्पणम् (मुखदर्पणम्)।

अध्यापकः वर्णान् उच्चर्यति । तत्समये अध्यायकमुखे जायमानानि व्यतियानानि अवलोकयितुं छात्रान् निर्दिशति । यथा अ।अ इत्यस्योच्चारणसमये मुखम् उद्घाटयति । अतः एव 'विवृतम्; इति आभ्यन्तरप्रयत्नः। आ इत्युच्चारणसमये मुखस्य विस्तारः ईषदधिकः । उभयोः स्थानं तु कण्ठः। 'अ' इत्यस्मात् भिन्नं भवति 'इ' इत्युच्चारणसमये मुखस्य स्थितिः । प फ ब भ म इत्येतेषामुच्चारणसमये ओष्ठयोः स्पर्शनं जायते। अत एव पवर्गस्य स्थानमोष्ठौ इति। अध्यापकस्य उच्चारणसमये सम्भूयमानं व्यतियानं छात्रः जानातु। पुनः दर्पणमवलोक्य छात्रः उच्चरति। तदानीं तादृशं व्यतियानं जायते वेति परिशोधयति। तादृशं व्यतियानं न दृष्टं चेत् पुनरपि गुरोरुच्चारणमाकर्ण्य परिशोध्य अक्षराणि पठन्तु।

टेप्रिक्कार्डर् द्वारापि उच्चारणं पठितुं शक्यते। अध्यापकस्य वर्णोच्चारणं टेप् कृत्वा छात्रः अनुच्चारणं करोति । पुनः एतदुभयं श्रुणोति । अतः व्यतियानं वर्तते चेत् तत् ज्ञातुं शक्यते। क्रमेण स्वालित्यं विना साधूच्चारणे समर्थः भविष्यति च।

## पुनरावृत्तिः (Recap)

- श्रवणमेव भाषापठनस्य प्रथमं सोपानम्।
- भाषा आशयविनिमयायोपयुज्यते ।
- भाषा कश्चन सांस्कारिकोत्पन्नः भवति ।
- वर्णाः द्विविधाः - स्वराः व्यञ्जनानि च ।
- स्वराक्षराणि स्फष्टतया उच्चारयितुं शक्यते ।
- स्वराक्षराणां साहाय्येन व्यञ्जनाक्षराणि स्पष्टतया उच्चारयितुं शक्यते।
- उच्चारणाय काश्चन रीतयः सन्ति ।
- स्थान-प्रयत्न-सर्ग-क्रिया-स्फुरणानुसारं पञ्च विधयः ।
- अक्षराणां पाठनानन्तरं क्रमशः पदानाम् उच्चारणपरिचयः।
- निपातानाम् द्व्यक्षरपदानां त्र्यक्षरपदानामित्यादिक्रमेण पदानि उच्चरितुं पर्याप्तं साहाय्यं देयम्।
- दर्पणं, टेप्रिक्कार्डर् इत्यादीनां साहाय्येन साधूच्चारणं परिशीलनीयम् ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. शिशुः कस्याः सकाशात् आद्याः शब्दाः श्रृणोति ?
2. लांग्वेज् इति पदस्य निष्पत्तिः कस्याः भाषातः जाता ?
3. भाषापठनस्य प्रथमं सोपानं किम् ?
4. कति व्यञ्जनाक्षराणि ?
5. कण्ठेन उच्चार्यमाणानि अक्षराणि कानि ?
6. सन्धिः कदा जायते ?
7. प्रयत्नानुसारं कति भेदाः ?
8. पदानामुच्चारणाय प्रथमं केषां पठनं कार्यम् ?
9. इकारः केन स्थानेनोच्चरति ?
10. उच्चारणपठनाय साहाय्यके उपकरणे के ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।

## (Answer the following questions in one or two sentences)

1. किं नाम पदम् ?
2. केषां साहाय्येन व्यञ्जनाक्षराणि स्पष्टतया उच्चारयितुं शक्यते ?

3. उच्चारणरीतयः काः ?
4. पदानाम् उच्चारणपाठनं कथं कर्तव्यम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

## (Answer the following questions in a paragraph)

1. भाषायाः प्राधान्यं विशदयत।
2. यत्नो द्विविधा – विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1.वर्णानाम् उच्चारणविषये विचारयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मातुः सकाशात्।
2. लाटिन् भाषातः।
3. श्रवणम्।
4. त्रयस्त्रिंशत्।(33)
5. अ क ख ग घ ङ ह विसर्गः (:) च ।
6. वर्णविकारे।
7. त्रयः भेदाः।
8. अक्षराणाम्।
9. तालु इति स्थानेन।
10. दर्पणं, टेप्रिक्कार्डर् च।

## सूचनाग्रन्थौ


1. प्रोफसर् सहदेवः, संस्कृताध्यापनम्(कैरली) अध्यायः 2, भाषा, नेत्री प्रसिद्धीकरणम्, अनन्तपुरी, 2002
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या, श्रीगोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 2011

# Unit-2

# शब्दसम्पत्तिः

## उद्देश्यानि (Learning Outcomes)

- शब्दानां ज्ञाने आशयावगतिः।
- शब्दज्ञानेन भाषापरिचयः।
- शब्दस्य प्राधान्यं भाषावगतिःच।

## प्राग्व्यपेक्षाः (pre requisites)

भाषा आशयविनिमयाय उपयुज्यते। भाषाज्ञानं सांस्कारिकोन्नतेः कारणमेव। भाषाज्ञानाय वाक्यपरिचयः कार्यः। शब्दसमूहः वाक्यम्। वाक्यज्ञानाय पदज्ञानमावश्यकम्। पदश्रवणेन पदार्थप्रतीतिः जायते। यावन्तः शब्दाः जानन्ति तावन्तः विज्ञानं आर्जयति। लोके मित्राणां यत्स्थानं तत्तुल्यं स्थानं पदस्यापि । आपदि मित्रं साहाय्यकमिव सदसि पदानि साहाय्यं कुर्वन्ति। शब्दज्ञानेनैव आशयावगतिः। अतः बाल्यादारभ्य शब्दसम्पादने छात्राः उत्सुकाः भवेयुः। शब्दसम्पत्तिः कदापि नष्टः न जायते। केवलं लाभ एव। धनमिव व्यये कृतेऽपि शब्दसम्पत्तिः वर्धते। अतः शब्दसम्पत्तौ श्रद्धा कार्या।

## प्रधानपदानि (keywords)

भाषायाः निम्नतले अक्षराणि वर्तन्ते। तेषामुपरि पदानि। पदेभ्यः वाक्यानि – पदं भाषायाः मौलिकतत्त्वेषु अतिप्रधानम् – शक्तं पदम् – शक्तिरस्यास्तीति शक्तम् – पदोच्चारणे श्रोतुः मनसि काचन शक्तिः वैमनस्यं वा जनयितुं शक्तिः – भाषायाः प्राणः भवति पदम्- पदस्यार्थज्ञाने प्रतिकरणजनकं – पदानां सविशेषताः – व्याकरणदृष्ट्या शब्दमेव सर्वम्- नादब्रह्मम्- साहित्यदृष्ट्या शब्दस्य अधिकं प्राधान्यम्- पदलक्षणम्- पदभेदाः – पदव्यापाराः – पदस्वाधीनतायै – पदावतरणाय विविधाः रीतयः- न्यायदृष्ट्या शब्दस्य प्राधान्यम् – आप्तवाक्यम् शब्दः।

## विशदीकरणम् (Discussion)

भाषा आशयविनिमयाय उपयुज्यते। भाषायाः निम्नतले वर्तमानानि अक्षराणि प्रधानानि भवन्ति। वर्णसमुदायः पदम्। सर्वाणि शास्त्राणि शब्दद्वारा एव प्रयुङ्क्ते। शब्दं विना वर्तमाना स्थितिः दुस्सहा वर्णनातीता च भवति। उक्तं च कविना दण्डिना काव्यादर्शे –

**इदमन्धं तमः कृत्स्नं जायेत भुवमत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते**। इति।

अर्थप्रकाशकः शब्दः ज्योतिरेव। इयं ज्योतिः न वर्तते चेत् भुवनत्रयं तमोनिबिडे निमग्नं भवेत्। शब्देनैव ज्ञानं सम्पादयितुं शक्यते। यावन्तः शब्दाः ज्ञाताः तावन्तः श्रेयः अवाप्स्यति। भगवता पतञ्जलिना सूचितं भवति यत् शब्दज्ञाने धर्मः अपशब्दज्ञाने असाधुशब्दज्ञाने च अधर्मः प्राप्नोति । यद्यपि असाधुशब्देनापि अर्थबोधः सिद्ध्यति तथापि साधुशब्दज्ञानमेवार्जनीयम्। कवयः साहित्यकाराश्च काव्ये साहित्ये च पददोषं न सहन्ते।

**तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।**
**स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् इति।**

पदं भाषायाः मौलिकतत्त्वेषु अतिप्रधानं भवति। किं नाम पदम्? पद्यते गम्यते ज्ञायते अनेन इति पदम् इति निरुक्तकारः ।सुप्तिङन्तं पदम् इति पाणिनिः। पदेन पदार्थबोधकमेव पदम्। अर्थात् वक्ता यं पदार्थमुद्दिश्य पदं प्रयुज्यते तं पदार्थमेव श्रोता गृह्णाति चेत् तदेव पदम्। शक्तं पदम् इति लक्षणमपि पदस्य युज्यते। शक्तिरस्यास्तीति शक्तम्। अर्थस्मृत्यनुकूलः पदपदार्थबन्धः शक्तिः। यस्य कस्यापि पदस्य श्रवणेन श्रोतरि न कोऽपि विकारः जायते चेत् अस्य पदस्यार्थं श्रोता न जानातीत्यर्थः । अस्माभिः अज्ञानभाषायां कोऽपि जनः भर्त्स्यर्यति चेत् न किमपि प्रतिकरणं जायते। केन कारणेन ? तत्पदं श्रोतरि विकारोत्पादनाय शक्तं नाभूत्।

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् इति पाणिनिः। सुप् इत्यनेन एकविंशतिः प्रत्ययाः। सु औ जस् इत्यादीनि । तिङन्तमित्यनेन तिङ् अन्ते यस्य तत् तिङन्तम् । अष्टादश तिङ् प्रत्ययाः। तिप् तस् झि इत्यादीनां प्रथमानां नवानां परस्मैपदित्वम्। अवशिष्टानां तङ्प्रत्ययानां आत्मनेपदित्वम्। रामः रामौ रामाः इति पदानि सुबन्तानि । तेषामन्ते यथाक्रमं सु – औ – जस् प्रत्ययाः सन्ति।

भवति – भवतः – भवन्ति इत्यादिनि परस्मैपदिनः क्रियापदानि । वर्तते – वर्तेते – वर्तन्ते इत्यादिनि आत्मनेपदिनः क्रियापदानि। नामपदानां क्रियापदानां च पदत्वमस्ति। किन्तु यास्कमते अव्ययादीनामपि पदत्वमस्ति। उक्तञ्च यास्केन – चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः इति । अव्ययानि अनेकानि । स्वरादिनिपातमव्ययम् इति पाणिनिः। क्त्वान्त- ल्यबन्त-तुमुन्नन्त-तसिलन्तादीनि अव्ययानि। पदानामव्ययादीनां च ग्रहणेन अर्थज्ञानेन च विज्ञानं संवर्धते।

भाषायाः प्राणभूताः भवन्ति शब्दाः। पदान्यपि तथा। व्याकरणदृष्ट्या शब्दमेव सर्वम्। वैयाकरणाः नादब्रह्मं ब्रह्मत्वेन कल्पयन्ति। उक्तञ्च भर्तृहरिणा वाक्यपदीये-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।** इति

यत् उत्पत्तिविनाशं विना, यतः प्रपञ्चस्य व्यवहारः संभवति सः शब्दस्वरूपमेव ब्रह्म इति।
शब्दः कथं जायते ? तस्य सोपानानि तु
1.वक्तुः मनसि श्रोतारं बोधयितुं कश्चन आशयः जायते।
2.आशयानुकूलं पदार्थमुद्दिश्य कञ्चन शब्दं जनयितुमिच्छति।
3. इच्छानुकूलं प्रयत्नेन उत्पन्ने वायौ चलनं संजायते।
4. चलनात्मकः वायुः मुखे कण्ठताल्वादिस्थानेषु स्पृष्ट्वा बहिरानयति। सः शब्दः।

शब्दस्य प्राधान्यविषये न्यायदर्शनमेवं सूचयति। आप्तवाक्यं शब्दः इति। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्यो इतीश्वरसङ्केतः शक्तिः इति।

भाषापठने, प्रथमं पदानि ज्ञातव्यानि। पदैः साकं पदानामर्थं च ज्ञातव्यम्। पदानि मित्राणि इव साहाय्यकानि। पदानां काश्चन सविशेषताः सन्ति।

1. कस्यचन पदस्य समानतया 100 शतमानं सदृशं पदं प्रायेण न दृश्यते। (साङ्केतिकपदानि विहाय)
2. पदानि अनेकार्थयुक्तानि भवन्ति। यथा गौः इति पदस्य पशुः , किरणः, वाक्, स्वर्गः, वज्रं, दिक्, नेत्रं, भूमिः, जलमित्यनेकार्थाः। आङ्गलभाषायां Table इति पदस्य एकनवतिरर्थाः। सन्दर्भानुसारमेव पदानामर्थः।
3. कस्यचन पदस्य पर्यायपदानि 100 शतमानं अनुयोज्यमिति वक्तुं न शक्यते। यथा भार्या, दाराः, पाणिगृहीती , दयिता, पत्नी, प्रिया, कलत्रम्, गृहिणी, प्रेयसी, कान्ता, वल्लभा, जामित्रम्, सहधर्मिणी इत्यादीनि। एकस्य पदस्य स्थाने अनेकानि पदानि। यया भर्यते सा भार्या। दारयन्ति भ्रातृन् शत्रून् इति दाराः। पाणिं गृह्णाति इति पाणिगृहीती।
4. एकस्य पदस्य स्थाने अनेकानि पदानि प्रयोक्तुं शक्यते इति सविशेषता संस्कृतभाषायाः प्राधान्येषु अन्यतमा भवति। यथा सूर्यस्य पर्यायत्वेन चतुर्पञ्चाशत् पदानि प्रयोक्तुं शक्यते। सूरः, सूर्यः, अर्यमा, आदित्यः, द्वादशात्मा, दिवाकरः, भास्करः, अहस्करः, ब्रध्नः, प्रभाकरः, विभाकरः, भास्वान्, सप्ताश्वः, हरिदश्वः, उष्णरश्मिः, द्युमणिः, तरणिः, मित्रः, चित्रभानुः, विरोचनः, विभावसुः, ग्रहपतिः, त्विषांपतिः, अहर्पतिः, भानुः, हंसः, सहस्रांशुः, सविता, तपनः, रविः, पद्माक्षः, तेजसांराशिः, छायानाथः, तमिस्रहा, कर्मसाक्षी, जगच्चक्षुः, अंशुमाली, त्रयीतनुः, प्रद्योतनः, दिनमणिः, खद्योतः, लोकबान्धवः, इनः, भर्गः, धामानिधिः, चण्डांशुः, पद्मिनीपतिः, विकर्तनः, अर्कः. मार्ताण्डः, मिहिरः, अरुणः, पूषा, अब्जिनीपतिः च पर्यायानि भवन्ति। तादृशानां पदानां पठनेन पदस्वाधीनशक्तिः वर्धते। तया भाषां सहसा वशीकर्तुं शक्यते।

2.1.पदव्यापाराः

पदानां त्रयः व्यापाराः सन्ति। ते अभिधा, लक्षणा,व्यञ्जना चेति।

**1. अभिधा** – सङ्केतितार्थगोचरः शब्दव्यापारो अभिधा। अस्यपदस्य अस्मिन्नर्थे प्रयोगः अस्ति इति रीतिः अभिधा। यथा गौः इति शब्दस्य उच्चारणे अस्माकं मनसि चत्वारः पादाः लाङ्गूलवती सास्नावतीरूपस्य कस्यचन मांसपिण्डस्य प्रतीतिः। सास्नालाङ्गूलककुदखुरविषादिनः जन्तुनः प्रतीतिः।

**2. लक्षणा** – वाच्यार्थस्य अनुपपत्तौ लक्षणा। वाच्यार्थानुपपत्या तत्संबन्धिनः शब्दव्यापारो लक्षणा । अशब्दव्यापारो लक्षणा इत्यपि उच्यते। शब्दे अयं व्यापारः न, किन्तु तस्य प्रतीतिः। यथा गङ्गायां घोषः । अत्र स्यन्दनशीलायां नद्यां घोषस्य असंभाव्यात् गङ्गायां तीरे घोषः इत्यर्थः लभते। अतः लक्षणा।

**3. व्यञ्जना** – अभिधया पुनः लक्षणया च अर्थं प्रकाश्य अनन्तरं या तृतीयमर्थं प्रकाशयति चेत् सा व्यञ्जना। उक्तञ्च –

**विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः**
**सा वृत्तिः व्यञ्जना नाम शब्दस्यार्थस्य च ।। इति।**

यथा गङ्गायां घोषः इत्यत्र तीरार्थप्रतीत्यनन्तरं गङ्गायाः तीरे घोषः इत्यतः शीतत्वं पावनत्वं इत्याद्याः गुणाः लभन्ते।

शब्दवृत्तिरपि त्रिधा – वाच्यार्थः, लक्ष्यार्थः, व्यङ्ग्यार्थः चेति।

पदस्य सान्दर्भिकार्थस्यैव प्राधान्यम्। सन्दर्भानुसारमेव अर्थः जायते। अस्मभ्यः अनिष्टः कश्चन गच्छति । तदा 'अयं गौः' इति प्रयुज्यते चेत् तत्र गोत्वार्थं न किन्तु मन्दः मूढः इत्याद्यर्थाः।

यावन्तः पदानि वयं जानीमः तावन्तः वयं भाषया सह बन्धं स्थापयामः पदस्वाधीनवतः जनस्य पुरतः भाषा रसनाग्रनर्तकी भविष्यति।

पदस्वाधीनं कथं जायते?

1. अनुकरणैः
2. प्रयोगैः

प्रथमं शिशुः मातुः पितुः स्वस्य समीपे वर्तमानस्य वा शब्दं श्रुणोति । वारं वारं श्रुत्वा शब्दमनुकरोति। पुनः अर्थज्ञानपुरस्सरं जानाति। ज्ञात्वा शब्दान् प्रयुङ्क्ते । प्रयोगैः भाषां पठति। भाषापठनस्य तत्त्वेषु नैसर्गिकतत्त्वं , प्रकटनतत्त्वं, प्रवृत्युन्मुखतत्त्वम्, अनुकरणतत्त्वं च प्राधान्यमर्हति।

नैसर्गिकतत्त्वे यावन्तः शब्दाः आकर्णयन्ति तावन्तः भाषां नैसर्गिकरीत्या पठन्ति। श्रवणेनैव पदस्य ह्रस्वदीर्घादीन् स्वरप्राधानीकरणं च जानाति। क्रमेण आशयं ज्ञात्वा अज्ञात्वा वा प्रकटयति। तदानीं भाषाशुद्धतायै प्राधान्यं न वर्तते। माता पिता वा स्खालित्यं दूरीकृत्य

साधूनि पदानि वक्तुं प्रेरयति। क्रमेण स्खालित्यं विना पदानि प्रयुङ्क्ते। तदेव प्रकटनतत्त्वम्। साधूनां पदानां वाक्यानां वा योग्येषु अवसरेषु परप्रेरणां विना बालः प्रयुङ्क्ते । तदेव प्रवृत्त्युन्मुखतत्त्वम्। मातुः पितुः अध्यापकस्य बान्धवानां वा सकाशात् शब्दाः श्रुत्वा अनुकर्तुं बालेषु या वासना वर्तते तदेव अनुकरणतत्त्वम्।

एवं शब्दसम्पत्तिं आर्जयित्वा भाषाप्रयोगे तत्पराः भवन्तु।

## पुनरावृत्तिः (Recap)

- शब्दज्ञानेनैव आशयावगतिः
- साहित्यदृष्ट्या शब्दस्याधिकं प्राधान्यमस्ति।
- यद्यपि असाधुशब्दज्ञानेनापि अर्थबोधः सिद्ध्यति तथापि साधु शब्दज्ञानमेवार्जनीयम्।
- नामाख्यातोपसर्गनिपाताः इति।
- अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
- पदानि अनेकार्थयुक्तानि।
- एकस्य पदस्य स्थानेऽनेकानि पदानि।
- अभिधा लक्षणा व्यञ्जना चेति पदव्यापाराः त्रिधा।
- पदस्य सान्दर्भिकार्थस्यैव प्राधान्यम्।
- पदसम्पत्यर्थं भाषापठनतत्त्वानि प्रयोक्तव्यानि।
- शब्दसम्पत्या भाषाप्रयोगसामर्थ्यं लभते।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. किम् नाम पदम्?
2. शब्दाह्वयं ज्योतिः न वर्तते चेत् किं संभवति?
3. पाणिनिमते किं नाम पदम्?
4. चत्वारि पदजातानि कानि?
5. पदानामर्थः कथमङ्गीकरोति?
6. संस्कृतभाषायाः प्राधान्येषु अन्यतमः कः?
7. का नाम अभिधा?
8. पदस्वाधीनं कथं वशीकर्तुं शक्यते?

**एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।**

**(Answer the following questions in one or two sentences)**

1. किं नाम नैसर्गिकतत्त्वम् ?
2. किं नाम अनुकरणतत्त्वम् ?

**एकैकया खण्डिकया उत्तराणि लिखत।**

**(Answer the following questions in a paragraph)**

1. पदानां सविशेषताः काः ?
2. पदव्यापारान् विशदयत।
3. पदसम्पत्तिं कथमार्जयितुं शक्यते ?

**निर्दिष्टाभ्यासः(Assignment)**

1. पदव्यापारं निरूपयत।

**वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)**

1. वर्णसमुदायः।
2. कृत्स्नं भुवनत्रयं तमसि निमज्जेत।
3. सुप्तिङन्तं पदम्।
4. नामाख्यातोपसर्गनिपाताः।
5. सन्दर्भानुसारम्।
6. अतिविपुला पदसम्पत्।
7. सङ्केतितार्थगोचरः शब्दव्यापारोऽभिधा।
8. अनुकरणैः प्रयोगैः च ।

SGOU

## सूचनाग्रन्थाः


1. प्रोफसर् सहदेवः, संस्कृताध्यापनम्(कैरली) अध्यायः 2, भाषा, नेत्री प्रसिद्धीकरणम्, अनन्तपुरी, 2002
2. Sampad and Vijay, The wonder that is Sanskrit (Eng), Sri Aurobindo Society, Pondicherry, 2002
3. भर्तृहरिः, वाक्यपदीयं, व्याख्या डो.के चन्द्रशेखरन् नायर्, कार्तिकबुक्स्, अनन्तपुरी,२००७


SGOU

# Unit-3

# कथाश्रवणम्

## उद्देश्यानि (Learning Outcomes)

- साहित्ये कथानां प्राधान्यं गृह्णाति।
- कथाग्रन्थानां परिचयः।
- संस्कृतकथानां सविशेषतामवगच्छति।

## प्राग्व्यपेक्षाः (pre requisites)

बाल्यादारभ्य बालाः कथां पठितुं तात्पर्यं प्रकटयति। भाषापठने कथानां पठनं नितरामुपकारकमेव। कथाः उपदेशपराः सन्मार्गप्रदर्शिन्यः च भवन्ति। स्वभावरूपीकरणे विज्ञानार्जने लोकव्यवस्थितिज्ञानाय च कथाः प्रेरणां ददति। गद्यसाहित्ये प्रचुरप्रचारं प्राप्ताः अनेके कथाग्रन्थाः सन्ति। पञ्चतन्त्रकथाः लोके प्रायेण सर्वासु भाषासु प्रसरिताः भवन्ति। विश्वभाषासु संस्कृतात् अनेके ग्रन्थाःअनूदिताः दृश्यन्ते।

कथाश्रवणेन भाषां प्रति प्रीतिरुत्पादयितुं शक्यते। प्रायेण मातामह्याः मातुः वा सकाशादेव बालकाः कथामाकर्णयन्ति। बालकान् निद्रातुं मातरः गानालपनं कुर्वन्ति। काश्चन मातरः लघुलघुकथाः वदन्ति। रामायणमहाभारतादिकथाः प्रायः सर्वाः मातरः जानन्ति। भारतीयसंस्कृतौ कथाः अन्तर्लीनाः भवन्ति। कथाश्रवणे श्रद्धेयान् अंशान् अधिकृत्य पठामः।

## प्रधानांशाः/ प्रधानपदानि (keywords)

माता - शिशुः- प्रधानाध्यापिका –प्रथमाध्यापिका- मातुः शब्दान्- परितः जायमानान् शब्दान् सश्रद्धम् – यावच्छक्तिः अनुकर्तुं – प्रथमे वयसि – गानालापं चित्तमाकर्षयति – पुनः कथाः श्रोतुं – इच्छा – कथाकथनसमये मातरमवलोकयति- लघुलघुकथाः कथनीयाः – पशुपक्षिकथाः – रसावहाः – महताम् चरितम्- कथाकथने – लघुलघुवाक्यानि- एकाशयाय एकपदमेव – वाक्ये क्रिया वर्तितव्यं इति नियमाः न – पुनः कर्ता क्रिया – पुनः त्रीणि पदानि – क्रमेण – चत्वारि पदानि – लघुलघुकथाः

## विशदीकरणम् (Discussions)

मातुः सकाशादेव प्रायेण शिशवः शब्दान् आकर्णयन्ति। यच्छब्दं शिशोः कर्णपुटे पतति तत् बालकस्य मस्तिष्के स्थास्यति। मातुः गानममृतमिव प्रतिभाति। मातुरधरोष्टकमवलोक्य तत्रत्यं चलनं वीक्ष्य शिशुः तदनुकर्तुं यतते । तदानीं शिशुभाषा उत्पद्यते। वारं वारं श्रवणेन शिशुः शुद्धतया उच्चरति। अतः माता शिशोः प्रथमाध्यापिका प्रधानाध्यापिका च जायते।

परितः जायमान् शब्दान् अपि शिशुरुच्चरितुं यतते। एवं प्रथमं गानम् आलपितुं यतते। 'अम्ब' इत्यस्य स्थाने कदाचित् अम् इत्युच्चरेत् । कदाचित् अम्मा इति भवेत्। म्म म्प इम्मा ....... इत्यादिकं वा भवेत्। शिशोः उच्चारणे शब्दोत्पादने वा वर्तमानं तात्पर्यं ज्ञात्वा माता शिशुं प्रेरयेत्। तदर्थं लघुलघुश्लोकाः पाठनीयाः।

**अहं नमामि मातरम् ।**
**गुरुं नमामि सादरम् ।**
**प्रभात एव हे पितः!**
**नमामि त्वामनारतम्।।**

इत्येतच्छ्लोकं पाठयितुमिच्छति चेत् ।

अहं इत्युक्त्वा अ. ह. म् इत्येवम् एकैकमक्षरमुच्चार्य पदं प्रथमं पाठनीयम्। अ ह म् इति शिशुमुच्चरति। पुनः न. मा. मि इति पदम् । मा.त.रम् इति पुनः। पादं पूर्णतया उच्चरतु – अहं नमामि मातरम्। द्विवारं त्रिवारं चतुर्वारं वा उच्चरतु। शिशवे शब्दान् अक्षराणि च श्रोतुमवसरः देयः। यदा अवसरः सिद्ध्यति तदा ईदृशरूपेण पाठयितुं श्रमः कार्यः।

एवं चित्रपतङ्ग चित्रपतङ्ग.. निकटमेहि मित्रक ...... इत्ययं श्लोकभागे त्र इति संयुक्ताक्षरं वर्तते। अवशिष्टाः सर्वे सहसा उच्चारणं कर्तुं मातृसाहाय्येन शक्यते। त्र इत्यक्षरं वारं वारं अनुवर्तनात् बालकोऽपि त्त त्त इत्येवं रूपेण कदाचित् उच्चरेत्। संयुक्ताक्षराणि प्रायेण त्यक्तव्यानि। चन्द्रः इति पदं चन्दिर इत्येवं रूपेण लघूकृत्य माता पिता वा उच्चरेत्।

बालाः कथाश्रवणे कुतुकिनः भवन्ति। कथां श्रोतुं तत्पराणां बालानां पुरतः मधुरस्वरेण सस्नेहं कथाः श्रावयितव्याः । तदर्थं प्रथमं नामपदानि एव प्रयोक्तानि। क्रियापदानामुपयोगः प्रथमतः न प्रयोक्तव्यः। महाभारतस्थां नहुषकथां अनेन रूपेणापि प्रयोक्तुं शक्यते। यथा नहुषः राजा। पुत्रवत् प्रजाः। शतं यागान्। इन्द्रः भूत्वा । नहुषरूपः इन्द्रः । अहङ्कारयुक्तः । इन्द्रभार्याम् अभिलषन्। रथवाहनाय। सप्तर्षीन्। यात्रायाम्। परुषवचनानि। कुपितः अगस्त्यः। शपितवान्। एवं सर्पः। भूमिपतनम्। अहङ्कारः विनाशाय।

कथासु कश्चन गुणपाठः आवश्यकः। बालकचित्तेषु सद्भावनां जनयितुं योग्याः भवन्तु कथाः। कतिपयानां पदानां श्रवणानन्तरं क्रियायुक्तानि वाक्यानि श्रोतुमवसरः देयः। नूतनपदावलीपरिचयेन साकं भाषावबोधः च कार्यः। अन्यां कांचन कथां अनेन रूपेण बालानां पुरतः वक्तुं शक्यते। कथायाः नाम सुचिन्त्या कार्यं कर्तव्यम्। यथा-

ग्रामीणः काशीं गच्छति। स्नातुं अभिलषति। धनस्यूतं कुत्र स्थापयेत् । सः चिन्तयति। तीरे गर्तं निर्मितव्यम्। तस्मिन् स्थापयामि। स्नातुं जले अवतरति। अन्या काचन शङ्का। तीरं सिकतापूर्णम्। गर्तं न प्रत्यभिजानामि। गर्तोपरि शिवलिङ्गं स्थापयामि। सः तदा अकरोत्।

नदीमवतार्य स्नाति। केचन एतदपश्यन्। पूर्वं शिवलिङ्गरचना कार्या। पुनः स्नानमिति चिन्तिताः। तत् ते अनुकुर्वन्ति। स्नानानन्तरं प्रत्यागतवान्। अनेकानि शिवलिङ्गानि अपश्यन्। स्वेन रचितं न ज्ञातम्। दुःखिता बभूव। प्रथमं सुष्ठु चिन्तनीया। आलोचनानन्तरं कर्म करणीयम्।

कथाः उपदेशात्मिका विज्ञानपराः च भवन्तु। स्वभावरूपीकरणाय युक्ताः बहवः पशुपक्षिकथाः सन्ति। अध्यापकाः मातरः मातामह्यः च तादृशाः कथाः ज्ञात्वा छात्राणां व्यक्तित्वविकासाय बालान् उपदिशन्तु। दुष्टजनैः सह संसर्गः अनर्थाय भवति इत्याशयसूचिकां काञ्चनकथां अनया रीत्यापि अवतर्तुं शक्यते। आसीत् कस्मिंश्चिदरण्ये कश्चन व्याधः। सः जन्तूनां ग्रहणे व्यापृतोऽभवत्। एकदा कमपि जन्तुं नालभत। श्रान्तः सः इतस्ततः चचाल। कस्यचित् वृक्षस्य छायायाम् उपाविशत्। क्रमेण सः निद्रां प्राप्नोत्। वृक्षे कश्चन काकः हंसः चास्ताम्। काकः स्वभावेन दुष्टः। हंसः दयालुः चासीत्। व्याधस्य मुखात् वृक्षच्छाया अपगता। सूर्यस्य उष्णरश्मयः मुखे अपतन्। हंसः अतिथिसेवा कार्या इत्यचिन्तयत्। अतः स्वपक्षौ प्रसारितवान्। छायया व्याधस्य मुखम् आवृणोत्। व्याधस्य निद्राभङ्गः नाजायत। काकः व्याधमुखे पुरीषं विसर्जितवान्। ततः अगच्छत्। पुरीषं व्याधस्य मुखे अपतत्। कुपितः सः उत्थितवान्। हंसमपश्यत्। हंसममारयत् च। अतः दुष्टसंसर्गः अनर्थाय भवति।

**1.3.1.कथाश्रवणे श्रद्धेयाः कार्याः**

1. कथाकथनाय उत्सुकः जनः कथां सम्यक् ज्ञातवान् भवेत्।
2. बालेभ्यः रुच्युत्पादनाय योग्याः कथाः स्वीकर्तव्याः।
3. बालानां वयोऽनुसारं भवेत् पदचयनम्।
4. बालेभ्यः परिचितानि पदानि प्रयोक्तव्यानि।
5. आवश्यकं चेत् पदानां लघुविवरणं देयम्।
6. कथास्वीकरणे कश्चन क्रमः स्वीकर्तव्यः।
7. सरलात् कठिनं प्रति इति तत्त्वानुसारं भवेत् कथाभागः।
8. क्लिष्टानि पदानि न प्रयोक्तव्यानि।
9. आशयपूर्णता वर्तितव्या।
10. प्रतिकथं गुणपाठः वर्तितव्यः।

**1.3.2.कतिपयानां कथाग्रन्थानां नामानि**

1. पञ्चतन्त्रम् – विष्णुशर्मा
2. हितोपदेशः – नारायणपण्डितः।
3. कथावाहिनी – एस् सि इ आर् टि प्रसिद्धीकरणम्, केरलसर्वकारः
4. गुणपाठकथकल् – (कैरली) आन्टणि इलवन्कुट्टि

5. उपनिषद्कथकल् (कैरली)- टि.के.रामकृष्णन्
6. नाटोटिकथकल् – (कैरली ) टि.एन् प्रभाकुमार्

## पुनरावृत्तिः (Recap)

- कथाः उपदेशप्रदाः सन्मार्गप्रदर्शिन्यः च भवन्ति।
- मातुः गानं शिशवे अमृतमिव प्रतिभाति।
- प्रथमासु कथासु नामपदान्येव प्रयोक्तव्यानि।
- कतिपयानां पदानां श्रवणानन्तरमेव क्रियायुक्तानि वाक्यानि श्रोतुम् अवसरः देयः।
- प्रतिकथं गुणपाठः वर्तितव्यः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. प्रायेण सर्वासु विश्वभाषासु प्रचलिताः कथाः काः ?
2. प्रायः शिशोः प्रथमाध्यापिका का ?
3. कस्यचन बालस्य मुखादागतं स्पष्टं पदं किं भवेत् ?
4. 'सुचिन्त्य कार्यं कर्तव्यम्' इति कथायाः गुणपाठः कः ?
5. बालानां पुरतः कथापाठनावसरे किं तत्त्वं स्वीकर्तव्यम् ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

## (Answer the following questions in one or two sentences)

1. प्रथमासु कथासु कीदृशानि पदानि प्रयोक्तव्यानि ?
2. प्रतिकथं किम् वर्तितव्यः?

## एकैकया खण्डिकया उत्तराणि लिखत।

## (Answer the following questions in a paragraph)

1. कथायाः प्राधान्यं विशदयत।
2. अम्बा नित्यं स्नापयति इति पङ्क्तिं कथं प्रथमतः संस्कृतं पठन्तं बालं पाठयति?
3. काञ्चन लघुकथां बालान् कथं पाठयति इति विशदयत।
4. कथासु वर्तमानं गुणद्वयं लिखत।

## निर्दिष्टाभ्यासः(Assignment)

1. कथाश्रवणे श्रद्धेयाः कार्याः संक्षिप्य लिखत।

## वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. पञ्चतन्त्रकथाः।
2. माता ।
3. यत् पदं शिशुः अधिकतया श्रुणोति तत्पदमेव ।
4. प्रथमं सुष्ठु कार्यं चिन्तनीयम् आलोचनानन्तरं करणीयम् ।
5. 'सरलात् कठिनं प्रति' इति तत्त्वम्।

## सूचनाग्रन्थाः (Reference)


1.प्रोफसर् सहदेवः, संस्कृताध्ययनम्(कैरली) अध्यायः 2, भाषा, नेत्री प्रसिद्धीकरणम्, अनन्तपुरी, 2002

2.कथावाहिनी, SCERT, Keralam, 2023

3.अम्बा, SCERT, Keralam, 2023

# Unit-4

## सम्भाषणकार्यशाला- प्रथमा स्तरीया

### उद्देश्यानि (Learning Outcomes)

- संस्कृतभाषां प्रयासं विना पठितुं शक्नोति ।
- भाषां श्रोतुं ग्रहीतुं च प्रेरणा दीयते ।
- भाषापठनाय साहाय्यकानि उपकरणानि परिचिनोति ।
- भाषाया: पठनाय शिल्पशालां सज्जीकरोति ।
- पठनाय साहाय्यकोपकरणानां प्रवर्तनरीतिमवगच्छति।

### प्राग्व्यपेक्षाः (Pre requisites)

भाषापठनाय चत्वारि सोपानानि सन्ति । तानि श्रवणं भाषणं वाचनं लेखनं च । भाषां सुकरया रीत्या प्रयोक्तुं प्रथमं श्रवणमेव कार्यम्। श्रवणेन भाषायाः स्वरूपं उच्चारणरीतिं स्वरप्राधानीकरणादिकं च ज्ञातुं शक्यते । श्रवणाय सम्भाषणकार्यशाला साहाय्यति ।

सम्भाषणकार्यशाला अतिविपुला भवति । अनेकानि उपकरणानि तस्यां शिल्पशालायां सन्ति । अतः कतिपयानां वस्तूनां विवरणमत्र विशदीकरिष्यति । यथार्थतः अस्मिन् भागे भाषापठनायोपयुक्तानि परीक्षणानि सन्तीत्यतः भाषापरीक्षणशाला इति वक्तुं शक्यते ।

अस्मिन् विभागे संस्कृतभाषाशिल्पशाला, तादृश्याः शिल्पशालायाः प्रयोजनानि कानि, सविशेषता काः, घटनाः काः इत्यादिकं विशदयति ।

### प्रधानांशाः/ प्रधानपदानि (Key words)

दृश्य-श्रव्यसाहाय्यकानि – द्रष्टुं श्रोतुं योग्यानि- तन्त्राणि - पठनानुकूलसाहचर्यनिर्मितिः- प्रयोगपरिचयः- इतरेषां प्रयोगं दृष्ट्वा परिचयसम्पादनम् - उच्चारणे शुद्धतावर्जनं - श्रद्धापूर्वं विज्ञानसम्पादनं-व्याकरणानां आवर्तनात् दृढीकरणं- सांस्कारिकोन्नतिम्- स्वयंपठनतात्पर्यम्-व्यक्तिगतपठनेन प्रोन्नतिज्ञानं-प्रयोगाय बह्ववसरः– भाषाप्रयोगे उच्चारणे भाषाशुद्धौ अनुकूलव्यतियानकरणं- वरिष्ठाध्यापकैः सह सम्पर्कः संवादः- छात्राणां पठनप्रोन्नतिज्ञानम् - छात्राणां स्तरानुकूलां भाषां - चयनायावसरः - साहित्य- सांस्कारिक- पारम्पर्यैः सह सहवर्तित्वं- कक्ष्यानुकूलपाठनाय संविधानं- सजीवां भाषां गृह्णाति।

## विशदीकरणम् (Discussions)

श्रवणं विना भाषां ज्ञातुं न शक्यते। भाषाग्रहणे प्रथमं सोपानं भवति श्रवणम् । श्रवणं द्विविधम्। आचार्यमुखात् अथवा स्वपरिस्सरात् साधनसामग्रीणां - टेप्रिकार्डर् - सङ्गणकयन्त्र- दूरभाषा- दूरवाण्यादीनां साहाय्येन वर्तमानं श्रवणम्। आङ्गलभाषायां Direct listening from Acharyas and hearing from technical equipment.

पुरातनविद्याभ्यासकाले गुरुमुखादेव विज्ञानार्जनं कृताम्। तदनुकूलाः सर्वशास्त्रपारंगताः आचार्याः आसन्। पठनाय बहुकालः चावर्तत। इदानीं स्थितिः भिन्ना। तादृशानां गुरूणामभावः तथा पर्याप्तस्य समयस्य चाभावः। अपि च विज्ञानानमाधिक्यमपि संजातम्। लोकव्यवस्थित्यनुसारं पाठ्यविभवा बहवः। पठनदैर्घ्यं तु विरलम्। अत: पठने पाठने च व्यतियानं संजातम्। दृश्यश्रव्योपकरणानां साहाय्यकं संजातम्।आधुनिकोपकरणानि संजातानि। पठनमपि रसावहरूपेण परिवर्तितम्। नूतनानि पठनतन्त्राणि आविर्भूतानि। शास्त्रमिव भाषायामपि परीक्षणशाला (Language laboratory) आविर्भूता। श्रोतुं बहवः अवसराः। द्रष्टुं अनेकानि कार्याणि। एकस्मिन्नेव समये श्रोतुं द्रष्टुं च शक्यते । अधिकेन्द्रियसहयोगेन संजातं ज्ञानं स्थिरं दृढं च भवति । श्रवणेन श्रोत्रेन्द्रियस्य मनसः च बन्धः। दर्शनेन श्रवणेन च युगपत् प्रवृत्या लब्धं ज्ञानं दृष्टं भवतीति विद्याविचक्षणाः वदन्ति। अतः भाषापरीक्षणशाला रूपीकृता सर्वकारैः ।

किं नाम संस्कृतभाषापरीक्षणशाला? दृश्यश्रव्योपकरणैः संस्कृतभाषापठनाय विशिष्टतया सज्जीकृता काचन शाला भवति। तस्यां शालायां भाषापठनाय प्रयोगाय च प्रेरकाणि बहूनि तन्त्राणि सन्ति ।

तस्यां परीक्षणशालायां छात्रेभ्यः प्रयोक्तुं योग्याः अवसरा: वर्तन्ते। परिशीलनेन प्रयोगेण च विविधाः भाषाशैलीः प्रयोगान्, व्याकरणविशेषान्, उच्चारणरीतीः, पदस्वाधीनतां कर्तुं योग्यान् अवसरान् भाषां सविस्तरं विशदीकर्तुं तथा संक्षिप्तीकर्तुं च शक्यते ।

### 1.4.1.संस्कृतभाषा परीक्षणशालायाः प्रयोजनानि कानि ?

1.**परस्परं प्रयोगान् द्रष्टुं शक्यते**। इतरेषां भाषाप्रयोगकौशलं ज्ञात्वा अनुकूलान् गुणान् स्वांशीकर्तुं शक्यते।

2.**उच्चारणे प्रोन्नतिः**। उच्चारणशुद्धिं सम्पादयितुं, तथा क्लिष्टानां पदानामुच्चारणं वरिष्ठाध्यापकैः कृतं कथमिति टेप् रिक्कारडर् – संगणकयन्त्रादीनां साहाय्येन ध्वनितं श्रोतुमवसरः लभते। अपि च वरिष्ठाध्यापकानां उच्चरितं कथमिति श्रुत्वा, स्वयं पदं श्लोकं वा उक्त्वा पारायणं कृत्वा वा पुनः श्रवणीयावर्तनं (play) क्रियते चेत् व्यतियानं ज्ञातुं शक्यते । तदर्थं उच्चारणमृदुतन्त्रिः (Software for pronouciation)उपयुज्यते ।

**3.धाराशक्तौ श्रद्धा** - आधिकारिकरूपेण सम्पादिते आचार्याणां वचनेषु सूक्तिसु वा, तथा नाटकाविष्कारचित्रीकरणं दृष्ट्वा संभाषणं श्रुत्वा भाषायाः स्वरूपं ज्ञातुं शक्यते । भाषां सुष्ठु गृह्णाति।

**4.प्रयोगद्वारा व्याकरणज्ञानम्** -_नाटकादिषु प्रभाषणादिषु व्याख्यानेषु वर्तमानां भाषां दृष्ट्वा व्याकरणे ज्ञानमार्जयितुं शक्यते । प्रयोगद्वारा व्याकरणपठनं, भाषाशुद्धिग्रहणं च सिद्ध्यति।

**5.सांस्कारिकावबोधनम्-** संस्कृतसाहित्यं, संस्कारं, पारम्पर्यं चाधिकृत्य बहुविध माध्यमोपकरणैः ज्ञातुं शक्यते।

**6.स्वयं पठनम्** - माध्यमोपकरणानां पठनसाहाय्येन स्वयं पठनं कर्तुं शक्यते । तादृशं पठनमेव श्रेयस्करं चिरस्थायि च ।

### 1.4.2.संस्कृतभाषापरीक्षणशालायाः सविशेषताः

**1.आधुनिक माध्यमोपकरणानि।**

भाषासम्बन्धिनः सर्वाणि कार्याणि अन्तर्जालसाहाय्येन अस्यां परीक्षणशालायां वर्तन्ते। सङ्गणकयन्त्रं,टेप्रिकार्डर्,लापटोप्,चित्राणि,वीडियो इत्यादीनि सन्ति। परस्परविनिमययुक्ताः मृदुतन्तवः(software) सर्वं कार्यं अस्मत्पुरःसरं अवतरन्ति ।

**2.वैयक्तिकप्रवर्तनमेखला ।**

लापटोप् प्रभृतीनि आधुनिकोपकरणानि छात्राणां सकाशे सन्ति चेत् स्वयमेव स्वशक्त्यनुसारं बहून् विषयान् ज्ञातुं शक्यते। तेनाधिकः समयलाभः। कप्यूट्टरः शिरोफोणः.( headphone) च साहाय्येन अधिकज्ञानमार्जयितुं शक्यते ।

**3.प्रतिफलनतन्त्रम्।(Response technique)**

अध्यापकस्य पाठनानन्तरं छात्राणां प्रतिफलनप्रक्रियां ज्ञातुं शक्यते । भिन्नरुचयस्तु छात्राः। छात्राः पाठ्यविषयं कियत्पर्यन्तं पठितम् अथवा छात्रैः ज्ञातम् इति परिशोधनाय वर्तमाना क्रिया भवति प्रतिफलनक्रिया। प्रतिफलनेन पर्याप्तं ज्ञानं छात्राः नार्जिताः न चेत् अत्यावश्यकार्याणि विशदयति अध्यापकः । तेन न्यूनतया गृहीतस्य छात्रस्य उच्चारणे व्याकरणे भाषाप्रयोगे वा परिवर्तनं कर्तुं शक्यते।

**4.वेर्च्युल् पठनम् (अमूर्तपठनम्)( Virtual learning)**

मध्ये मध्ये वरिष्टाध्यापकैः सह सम्पर्केण पठनं साधयितुं शक्यते । अपि च छात्रस्य पाठ्यविषये कुत्र न्यूनता दृश्यते तत्र प्राधान्यं दत्त्वा पाठनाय इयं रीतिरुपकरोति ।

**5.प्रोन्नतेः चरणपथग्रहणम् (Progress Tracking)**

छात्राणां पठनप्रोन्नतिं मापनाय आधुनिकोपकरणं वर्तते। तस्य साहाय्येन कस्मिन् विषये बालस्य ज्ञानं न्यूनमिति ज्ञात्वा तत्र वैयक्तिक प्राधान्यं दत्त्वा पाठयितुं शक्यते ।

**6.पाठ्यविषयस्य सविशेषता**

पाठ्यविषयस्य सविशेषतां गृहीत्वा उचितां पाठनरीतिं तत्र प्रयोक्तव्या । अध्यापकेन पाठितं विषयं छात्रैः दृढतया ज्ञातं भवेत्। तदर्थं या प्रणाली साहाय्यकं तां प्रणालीं स्वीकृत्य पाठनीयम्। गद्य-पद्य-व्याकरण-नाटकादीनां भिन्नाः विधयः सन्ति । उचिता प्रणाली स्वीकर्तव्या-विषयस्य कठिनतानुसारम्।

**7.कक्ष्यापाठनेन पूर्णताप्राप्तिः**

कक्ष्यापाठनसमये विषयस्य पूर्णताप्राप्त्यर्थं परीक्षणशालायाः प्रवर्तनं साहाय्यकं भवति । लक्ष्यं पूर्णतया प्राप्नोति । सन्देहं विना पाठ्यविषयं ज्ञातुं शक्यते।

**8.सर्वस्वीकार्यता, समयलब्ध्यनुसारं पठनसन्नद्धता।**

स्वयं पठनाय, छात्रस्य समयानुसारं पाठभागप्रवेशनं, इच्छानुसारं पठनमित्यादिनि कार्याणि अत्र सुकरया रीत्या लभते । अध्यापकस्य सान्निध्यं कक्ष्यायाः सज्जीकरणमित्यादीनि न परिगण्यते इच्छानुसारं शक्त्यनुसारं समयलब्ध्यानुसारं पठितुमवसरःवर्तते।

**1.4.3.संस्कृतपरीक्षणशालायां वर्तमानानि उपकरणानि (Materials/equipments)**

1. सङ्गणकयन्त्रं कर्णावरणयुक्तम् (Computer with headphones )
2. विविधमाध्यमोपकरणानि (Multimedia Resources)
3. उच्चारणशुद्धिनिर्णयरूपमृदुतन्तवः (Prounciation software)
4. वेर्च्युल् पाठनमृदुतन्तवः (Virtual tutoring softwares)
5. प्रगति निर्णयानुकूलोपकरणानि (Progress Tracking tools)
6. कक्ष्यायां पूर्णतानिर्णयोपकरणानि (classroom integration tools)
7. जङ्घमदूरभाषा आप्प्स् (Mobile Apps)
8. दृश्योपकरणानि (Videos)

## पुनरावृत्तिः (Recap)

- श्रवणाय सम्भाषणकार्यशाला साहाय्यति ।
- भाषाग्रहणे प्रथम सोपानं भवति श्रवणम्।
- पठने पाठने च दृश्यश्रव्योपकरणानां साहाय्यं नितरामपेक्षते।
- अधिकेन्द्रियसहयोगेन संजातं ज्ञानं स्थिरं दृढं च भवति ।
- संस्कृतसाहित्यं संस्कारं पारम्पर्यं चाधिकृत्य बहुविध माध्यमोपकरणैः ज्ञातुं शक्यते।
- संस्कृतभाषापरीक्षणशालायां वैयक्तिक प्रवर्तनमेखला वर्तते।
- पठनप्रोन्नतेः स्थितिं जानाति ।

- विविधमाध्यमोपकरणानां साहाय्येन पाठभागं ज्ञातुं, तथा चित्रद्वारा अवगन्तुं छात्राणां प्रतिफलनानुसारं प्रतिक्रियां कर्तुं च शक्यते।
- पठनलक्ष्यं पूर्णतया प्राप्तमिति ज्ञातुं पूर्णतानिर्णयोपकरणेन (classroom integration tool) शक्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. किं नाम संस्कृतभाषापरीक्षणशाला?
2. उच्चारणशुद्धिं परिशोधयितुं साहाय्यकस्य उपकरणस्य नाम किम् ?
3. भाषासम्बन्धिनः सर्वाणि कार्याणि अस्मत्पुरःसरं के अवतरन्ति?
4. स्वयं पठनाय साहाय्यकं पाठन साहाय्यकोपकरणं किम्?
5. छात्राणां पठनप्रोन्नतिं ज्ञातुं प्रयुक्तमानं साहाय्यकोपकरणं किम् ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।

## (Answer the following questions in one or two sentences)

1. पठने पाठने च केषां साहाय्यं नितरामपेक्षते ?
2. विविधमाध्यमोपकरणानां प्रयोजनम् किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

## (Answer the following questions in a paragraph)

1. संस्कृतभाषापरीक्षणशालायाः सविशेषताः काः?
2. संस्कृतभाषापरीक्षणशालायाः प्रयोजनानि विशदयत।
3. किं नाम पूर्णतानिर्णयोपकरणम् ? (Classroom Integration tool)

## निर्दिष्टाभ्यासः (Assignments)

1. संस्कृतसंभाषणंकार्यशालायाः प्रयोजनानि कानि?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. दृश्यश्रव्योपकरणैः संस्कृतभाषापठनाय विशिष्टतया सज्जीकृता काचन शाला भवति संस्कृतभाषा परीक्षणशाला ।
2. उच्चारणमृदुतन्तुः (Pronunciation software)
3. परस्परविनिमययुक्ताः मृदुतन्तवः (softwares)
4. सङ्गणकयन्त्रम्
5. प्रगतिनिर्णयानुकूलोपकरणम् (Progress tracking tool)

## सूचनांशाः (Reference)

1. लाप्टोप्पः साहय्येन लब्धाः प्रधानांशाः - Regarding materials/ equipment and other requirements for a sanskrit language laboratory.

BLOCK - 2

# प्रसारमाध्यमानां भाषा

SGOU

# Unit-1

# संस्कृते विज्ञापनचित्राणि

## उद्देशेयानि(Learning Outcomes)

- संस्कृतसम्भाषणं श्रुत्वा आशयावगतिः ।
- दैनन्दिनव्यवहारे संस्कृतभाषाप्रयोगः ।
- प्रसारमाध्यमानां भाषामवगच्छति ।
- अन्तर्जाले वर्तमानान् संस्कृतगानानां संस्कृतचित्राणां चाविष्कारं श्रुत्वा दृष्ट्वा चानन्दानुभूतिः।
- संस्कृते विज्ञापनचित्राणि रचयितुं प्रेरणादानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषा आशयविनिमयाय उपयुज्यते । भाषया साकं चित्राणि च सन्ति चेत् आशयं झटित्यवगन्तुं शक्यते। इदानीं विज्ञापनेनैव सर्वाणि क्रयविक्रयाणि प्रचलति । तेनाधिकः समयलाभः । क्लेशं विना अस्मभ्यं साधनसामग्रीः क्रेतुं शक्यते। अधुना प्रतिकुटुम्बं अङ्गाः विरलाः। प्रायेण सर्वत्र "अणुकुटुम्बम्" वर्तते। केरलादिषु संस्थानेषु वयोजनानां संख्या वर्तते। कतिपयवर्षाभ्यन्तरे केरलं वृद्धसंस्थानमिति पदवीं प्राप्नुयात्। अतः अन्तर्जालाधिष्ठितानि विज्ञापनानि आवश्यकानि। विज्ञापनानि आकर्षकाणि भवेयुः। युवकानां चित्तेषु विज्ञापनचित्राणि पतित्वा साधनानां क्रयाय विक्रयाय च ते प्रेरिताः भवन्तु । अतः सङ्गणकयन्त्रद्वारा अन्तर्जालद्वारा विज्ञापनं सुष्ठु करणीयम्। संस्कृतसंगीते, संस्कृतचलचित्रे च दृश्यमानानि विज्ञापनचित्राणि तत्सम्बन्धीनि कार्याणि चात्र विशदयति।

## प्रधानांशाः/ प्रधानपदानि (Key words)

अन्तर्जालायुगः – भाषाप्रयोगेऽपि व्यतियानं- प्रादेशिकभाषाप्रभावः संस्कृते - प्रसारमाध्यमे भाषायाः स्थानं - नैसर्गिकरूपेण भाषाप्रयोगः- उच्चारणे ईषत् परिणामः - उच्चारणरीतौ स्वरप्राधानीकरणं - भाषा श्रोतुं कौतुकं - विज्ञापनाय श्रमः - तस्य लाभाः - आकर्षकत्वं - चित्राणां स्थानं - चित्राविष्करणेन अनेकाशयसूचकत्वं संस्कृतगानानि, you tube द्वारा

वर्तमानानि बहूनि - अन्तर्जालद्वारा वर्तमानानि विज्ञापनकार्याणि - मासिकायां वर्तमानानि - सङ्गणकद्वारा youtube द्वारा वा वर्तमानानि चलचित्राणि।

## विशदीकरणम् (Discussion)

अन्तर्जालयुगेऽस्मिन् बह्वः सविशेषताः सर्वेषु मण्डलेषु संजाताः। भाषामण्डलेऽपि अनेके विशेषाः सन्ति । वरेण्यभाषारूपेणा प्रशोभमानायां संस्कृतभाषायां तस्याः प्रभावनाशं विना द्वितीया काचन सरणिराविर्भूत । तस्यां सरण्यां प्रयासं विना संस्कृतभाषायाः उपयोगः । प्रयोगद्वारा संस्कृतस्य संभाषणभाषा इति स्थानं वोढुं शशाक । निरक्षराः अपि संस्कृते भाषितुं तत्पराः निपुणाः च संजाताः । संस्कारवाहिनी इति स्थानेन सह जनकीयभाषा इति स्थानं संस्कृतभाषा इदानीं वहति । आकाशवाण्यां दूरदर्शिन्यां च संस्कृतप्रसारणं विपुलरूपेण प्रचलति । अपि च कैरल्यामपि एकस्मिन् चानल्मध्ये (channel) जनम् दूरदर्शनि प्रतिदिनं संस्कृतभाषायां वार्ताः प्रचालयन्ति। कैरल्या सह संस्कृतस्य नितरां बन्धत्वात् निरन्तरसंस्कृतभाषाश्रवणेन सामान्यजनैरपि संस्कृतं ज्ञातुं शक्यते।

प्रसारमाध्यमानां भाषायाम् ईषद्भेदः, कदाचित् संभवेत्। उच्चारणे वेगता, स्वरप्राधानीकरणे भेदः च वर्तते। किन्तु, दृश्यसाहाय्येन वार्तावतरणात् वार्तां ज्ञातुं शक्यते।

विज्ञापनेन क्रयविक्रयमधिकतया प्रचलति । सर्वेषु मण्डलेषु विज्ञापनमिदानीं प्रचलति। आकर्षकाणि विज्ञापनानि आधुनिके अन्तर्जालयुगे सन्ति । अन्तर्जाले वर्तमानानि अनेकानि गानानि सन्ति, तानि चित्ताकर्षकाणि विज्ञानप्रदानि च भवन्ति। चित्रसहितानि विज्ञापनानां, महती प्रीतिः लभते । वारिकासु मासिकासु दिनपत्रेषु सर्वत्रापि विज्ञापनानि, विज्ञापनचित्राणि सन्ति । यथा सम्भाषणसन्देशः नामिकायां मासिकायां वर्तमानकं एकं विज्ञापनमधो दीयते।

VASTU RAVIRAJ भारतीत सर्वोत्तम वास्तुशास्त्रम् ।
मार्गदर्शन - आणि-प्रशिक्षण संस्था।
1५ वर्षे यशस्वी वास्तुशास्त्रपरम्परा... ५०००+ अधिक सन्तुष्टग्राहकाः

वास्तुशास्त्र : मार्गदर्शन उपायः

अत्रमेकं चित्रम्

नवीन वास्तुवी निबडम्
विज्ञान स्फोटोपाययोजना

माध्यमागतवास्तु दोषनिवारणम्।

- ❖ भवन-कार्यालय-पीटिका-कर्मशाला- होटल्-आतुरालय- बाङ्क्- शाला- कलाशालादि-वास्तुमार्गदर्शनम्।
- ❖ वास्तुरविराज-उत्पादने,
- ❖ सर्वोच्चवास्तुदोष निवारणे
- ❖ 100% वास्तुदोषनिवारणम्

वास्तुशास्त्रापरिक्षणम्

- 17000 विद्यार्थिनः ।
- प्रात्यक्षिक कार्य पठनानि।
- भूखण्ड निवासी - व्यावसायिक-औद्योगिक- वास्तु प्रचण्डज्ञानम्

पिरमिड- यन्त्र - क्रिस्टल् तथा सर्वोपयोजनानां, सम्पर्कज्ञानम्

अपरं चित्रम्

वास्तुविराजकार्याणि
सौन्दर्यादि पवित्रग्रहणेन वास्तुविराजः
वास्तुशास्त्रानुसारक्रियाः।
निवासी-व्यावसायिक-औद्योगितवास्तुविद्याः

| | | | | |
|---|---|---|---|---|
| भवनं | कलालयः | पीटिका | कर्मशाला | भक्षणशाला |
| बांक् | शाला | कलाशाला | | |

ठाणे कार्यालयः 102, सनराईज विज्ञनेस पार्क, रोह.नं 16
किसन नगर, वागले इस्टेट्, ठाने (प) - 400608
पूणे कार्यालयः- अमरपार्क्, शिरोलेमार्ग

SGOU

जे.एम् रोड् - पूणे -411005
Call - 7777027835
E-mail info@vasturavij in/website   www.vastuviraj.co.in

यद्यपि संस्कृतभाषायां विज्ञापनानि अनेकानि न सन्ति तथापि इतस्ततः कतिपयानि सचित्रविज्ञापनानि दृश्यन्ते। इदानीं वर्तमानानि कतिपयानि-

**1. अन्तर्जालाधारिताः यूटूब् सदृशाः।**

ते पूर्णतया संस्कृते रचिताः संस्कृते परिवर्तनीकृताः(dubbed) वा/ तान् प्राप्तियुक्तान् लिङ्क्(link) अस्मिन् पाठभागे दीयते।

**2. संस्कृतसूक्तयः**

आकाशवाण्यां दूरदर्शिन्यां सर्वकलाशालायां च संस्कृते वर्तमानानि आप्तवाक्यानि वर्तन्ते। तानि तु आयुर्वेद- योग- परम्परागतसम्बद्धानि भवेयुः। यथा शुद्धं स्वास्थ्यम्।

**3. नामरूपीकरणम्**

पारम्पर्यसूचकं – दिव्यत्वसूचकं च नामानि कदाचित् प्रज्ञापनेषु दृश्यन्ते। यथा दिव्यम् (divine)   । डाबर् च्यवनप्रासनिर्माणे इदमाप्तवाक्यम् दृश्यते -डाबर् च्यवनप्रास- 'स्वस्थजीवनस्य सहचरः' इति आत्मीय-सांस्कारिकविज्ञापनेषु पूजासम्बन्धानि नामानि दृश्यन्ते।

**4.आयुर्वेदे**

आयुर्वेदसम्बन्धेषु विज्ञापनेषु शरीरस्य स्वास्थ्यरूपकाणि नामानि वर्तन्ते। पौराणिक नामकरणमपि औषधेभ्यः दीयते यथा 'पतञ्जलिः' तादृशेन नामकरणेन पौराणिकं , पवित्रताम् आत्मीयतां च गणयन्ति इति विश्वासः।

**5. सांस्कारिकावबोधाय संस्कृतनामानि कतिपयेभ्यः उत्पन्नेभ्यः दीयन्ते।**

विज्ञापनेन संस्कृतभाषाप्रचारः विपुलतया जायते। शरीरमाद्यं संरक्षणीयमिति बोधः आयुर्वेदीय विज्ञापनेन सिद्ध्यति। इतस्ततः वर्तमानान् काव्यांशान् श्लोकांशान् आप्तवाक्यांशान् च ज्ञातुं शक्यते। अपि च संस्कृतभाषायाः उपयोगः सर्वेषु मण्डलेषु वर्तते इति ज्ञातुं शक्यते।

**विज्ञापने श्रद्धेयाः कार्याः -**

1. उच्चारणे परिशीलनम् - विज्ञापनं वाचयितुं आशयं ग्रहीतुं इतरभाषायामाशयं विशदीकर्तुं च योग्यं भवेत्।

2. नूतनपदावलीपठनम्- उत्पन्नाय योग्याय नामकरणाय श्रद्धा देया।

3. भाषाप्रयोगे अभिनन्दनं देयम्- संस्कृतस्य उपयोगः शक्त्यानुसारं पोषणीयः।

**संस्कृतगानेभ्यः संस्कृतपठनम्**

विज्ञापनेषु संस्कृतगानानि संस्कृतचलचित्राणि चान्तर्भवन्ति। गानपठनं भाषापठने प्रमुखं स्थानं वहति। हि गद्यसाहित्यादधिकं पद्यसाहित्यस्य वर्धना प्रायेण सर्वासु भाषासु सन्ति । संस्कृते इयं स्थितिरेव । आदिसाहित्यं वेदसाहित्यमपि गानात्मकरूपेण संजातम्।

**2.1.1.संस्कृतगाने श्रद्धेयाः केचनांशाः–**

**1.भावगीतविशदीकरणम् (Analize lyrics)**

संस्कृतगानानां भावे श्रद्धा देया । गानानां पदानि अर्थज्ञानाय व्याकरणज्ञानाय च विघट्य आशयमवगच्छतु।

**2. आवर्तनेन पठतु (Learn through repetition)**

पदज्ञानाय उच्चारणाय वृत्तज्ञानाय च श्लोकान् आवर्तयतु।केवलम् एकवारश्रवणेन आशयान् पदानि उच्चारणं वा सुष्ठु ज्ञातव्यमिति न । आवर्तनेन भाषां वशीकर्तुं शक्यते।

**3. अन्यैः साकं गायतु (Sing along)**

यदि व्यक्तिगतपारायणे वैमुख्यं तदा इतरैः सह संयुज्य गायतु। इतरेषामुच्चारणरीतिं जानातु। तेषां गानपारायणरीतिं श्रुत्वा अनुकरणीयं चेत् अनुकरोतु। संस्कृतसंभाषणे अनायासत्वमनुभवतु। पदस्वाधीनतां संवर्धयतु ।

**4.सांस्कारिकसूचनाभिः परिचितः भवतु (Explore cultural references)**

सांस्कारिक-साहित्यपरेभ्यः पदेभ्यः सूचनाभिः च सह परिचितः भवतु । चरित्रपरेषु पुराणसम्बन्धेषु कार्येषु च श्रद्धां ददातु । पुनः तत्कार्ये गवेषणं क्रियताम्। गानेषु अन्तर्भूतेषु दार्शनिककार्येषु श्रद्धा कार्या ।

**5. संस्कृतगानानां भाषान्तरीकरणम् (Use lyrics Translations)**

भावगीतानां भाषान्तरीकरणमस्ति चेत् तदपि परिशोधयतु। प्रादेशिकभाषायां आङ्गलभाषायाम् आवश्यकं चेत् विवर्तनं कार्यम्। यथार्थसंस्कृतं अनूदितसंस्कृतं च मिथः परिशोधना कार्या। भाषायाः शुद्धिं प्रयोगं च जानातु ।

**6. पदावलिं पठतु (Study vocabulary)**

प्रधानानि संस्कृतपदानि तेषामुपयोगाश्च जानातु। प्रधानपदानां चार्टपत्राणि रचयतु। नूतनपदैः साकं नित्यपरिचयः प्राप्नोतु ।

**7 .विशदीकरणं वितरणं च (Discuss and share)**

संस्कृतगानानि अधिकृत्य सुहृद्भिः सह चर्चा कार्या। यद्यत्र संशयमस्ति चेत् वरिष्ठैः सह चर्चा कार्या। गानविषये तव मतं अन्यैः सह वितरतु। सह पठनाय तत्परः भवतु। इतरेषां मतानि चाङ्गीकुरु।

**2.1.2.प्रधानतया वर्तमानानि कतिपयानि गानशकलानि तेषां वेब्सैट् च**

1.लोकाः समस्ताः सुखिनो भवन्तु / May all beings be happy and free
https://m.youtubecom/watch?v=x1

2. संस्कृते वर्तमानानि श्रीवल्ली गानानि (Sreevali song in Sanskrit)
From the film Puspa starring Allu Arjun and Rashmika
https:/www.youtube.com/watch?v=ykW3bZMs MDC

3 भारताय संस्कृतस्नेहगानम् (Sanskrit love song to India.)
गैयिआ (Gaia) संस्कृतगानानि सुन्दराणि गानसमुच्चयानि भवन्ति । गब्रिल्ला बुर्णल् (Gabriella Burnel) महाशयेन चित्रीकृतमिदं आङ्गलभाषातः संस्कृते अनूदितं भवति।
https:// youtube.com/watch?v=Vpv8eMIXuzM

4. बाहुबलिचित्रादुद्धृतं गतकतहगानम्। Jatakataha Long from Bahubali.
प्रसिद्धचलचित्रात् बाहुबलितः उद्धृतं संस्कृतगानम्
https://www.youtube.co 2.com/watch?v=7E4dr 530HEQ

5. सुभाषितम् (Subhashitam)
सुभाषितश्लोकाः । काव्यनाटककथासु वर्तमानाः संस्कृतश्लोकाः तत्त्वम् नामके चानलि वर्तन्ते।
https://m.youtube.com foundeh? v=DVmL-00Sg/to

## पुनरावृत्तिः (Recap)

- अन्तर्जालयुगे भाषायामपि अनेकानि भनिभानानि संजातानि ।
- प्रसारमाध्यमस्थायां भाषायां उच्चारणे स्वरप्राधानीकरणे च नैसर्गिकं व्यतियानं जायते ।
- प्रसारमाध्यमभाषायां व्यतियाने सत्यपि दृश्य-श्रव्याविष्कारस्य प्रभावात् सहृदयानाकर्षयन्ति ।
- विज्ञापनेन क्रयविक्रयमधिकतया प्रचलति ।
- पाठभागे वर्तमानस्य विज्ञापनस्य पञ्चविंशति वर्षपूर्वमेव जातम्।
- अन्तर्जालाधारिताः युटूबः संस्कृते रचिताः संस्कृते परिवर्तनीकृता (dubbed) वा भवन्ति।
- पारम्पर्यसूचकं दिव्यत्वसूचकं च नामानि प्रज्ञापनेषु दृश्यन्ते।

- भारताय संस्कृतस्नेहगानम् गब्रिल्ला बुर्णल् (Gabriella Burnel महाभागेन चित्रीकृतम् ।
- वास्तुशास्त्रपरीक्षणे ११००० विद्यार्थिनः सन्ति ।
- गतकहगानं बाहुबलिचित्राद् उद्धृतम् ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अन्तर्जालयुगस्य सविशेषता का?
2. संस्कृते भाषणं कुर्वन् कैरलीचानल् किम्?
3. व्यावसायिक मण्डले कस्य प्राधान्यं वर्तते ?
4. सम्भाषणसन्देशः इति वार्तापत्रिका कस्मिन् विभागे अन्तर्भवति ?
5. मार्गदर्शन - आणि-प्रशिक्षणसंस्थायाः विज्ञापनचित्रं केषु केषु कार्येषु उपयुज्यते?
6. वास्तुशास्त्रपरीक्षणे कति विद्यार्थिनः सन्ति ?
7. आयुर्वेदसम्बन्धी किञ्चन आप्तवाक्यं किम् ?
8. व्यक्तिगतपारायणे वैमुख्ये किं करणीयम् ?
9. लोकाः समस्ताः सुखिनो भवन्तु इत्याप्तवाक्यस्य वेब्सैट् किम्?
10. तत्त्वम् नामके चानलि किं वर्तन्ते?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

(Answer the following questions in one or two sentences)

1. प्रज्ञापनेषु किम् दृश्यन्ते ?
2. तत्त्वम् (tattvam) नामके चानलि (channel) किं वर्तन्ते?
3. विज्ञापनेन किम् प्रचलति ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

(Answer the following questions in a paragraph)

1. विज्ञापनचित्राणां सविशेषताः काः?
2. युष्माकं परिचये वर्तमानमेकं विज्ञापनचित्रं विशदयत ।
3. संस्कृतगानेभ्यः संस्कृतपठनं कथमिति विशदयत ।

## निर्दिष्टाभ्यासः (Assignment)

1. विज्ञापनचित्राणां सविशेषतां निरूप्य एकं विज्ञापनचित्रं आविष्कुरुत।
2. संस्कृतभाषाप्रचारे यूट्यूबः प्राधान्यं विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. प्रादेशिकभाषाप्रभावः, नैसर्गिकरूपेण, भाषायाः प्रयोगश्च वर्तते ।
2. जनम्
3. विज्ञापनचित्रस्य ।
4. मासिकाविभागे ।
5. भवनं कार्यालयः- पीटिका-कर्मशाला - भक्षणशाला- आतुरालयः- बांक- शाला. कलाशालासु ।
6. 11000
7. शुद्धं स्वास्थ्यम्।
8. इतरैः सह संयोज्य गायतु ।
9. https://youtube.com/watch?v=x1
10. काव्यनाटककथासु वर्तमाना: श्लोकाः ।

## सूचनांशाः (Reference)


1. Sanskrit Movies and Songs.docx.from internet
2. Learning Sanskrit from Advertisement docx.from internet

BLOCK - 3

# भाषणम्

SGOU

# UNIT 1

# अक्षराणां पदानां च मौखिकाभ्यासः

## उद्देश्यानि (Learning Outcomes)

- संस्कृतभाषायां भाषणं कर्तुं शक्त्युत्पादनम् ।
- संस्कृताक्षराणि ज्ञात्वा पदानि लिखितुं प्रभावोत्पादनम्।
- पदानामर्थानां च परिचयः।
- सरलया रीत्या संस्कृते भाषते ।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषायाः पठने प्रधानतया चत्वारि सोपानानि सन्ति। तेषु प्रथमं भवति श्रवणम् । श्रवणं विना भाषां पठितुं न शक्यते । छात्राः शिशवः च पर्याप्तान् शब्दान् श्रुत्वा शब्दानामनुकरणाय यतन्ते । कदाचित् शिशूनां प्रथमोच्चारणे उच्चारणस्वालित्यं सम्भवेत्। शब्दान् पूर्णतया प्रकटयितुं ते असमर्थाः सन्त्यपि वारं वारं श्रवणेन उच्चारणाभ्यासेन च सुष्ठु रीत्या शब्दान् उच्चरन्ति । प्रथमं एकैकं पदमुच्चरति। तत्र क्रियापदं प्रायेण न वर्तते । पुनः क्रियायुक्तं पदद्वयमुच्चरति । पुनः पदानि । एवं क्रमेण भाषणाय आरभते । प्रयोगेण भाषणेन च भाषां वशीकर्तुं शक्यते।

भाषापठनस्य द्वितीयं सोपानं भवति भाषणम्। भाषणाय वाक्यानि उपयुज्यते । वाक्ये पदानि सन्ति । पदे अक्षराणि सन्ति । अक्षराणां ग्रहणाय प्रथमं मौखिकाभ्यासः कार्यः । मौखिकाभ्यासस्य आरंभः मातुः पितुः परिवारस्य च सकाशाद् आरभते । अस्मिन् एकके अक्षराणां पदानां मौखिकाभ्यासविषयं चिन्तयामः ।

## प्रधानांशाः/प्रधानपदानि (Keywords)

भाषा- आशयविनिमयः- मातुः पितुः परिस्सरात् वा शिशवः शब्दान् गृह्णन्ति-अनुकर्तुयतन्ते - अनुकुर्वन्ति - स्पष्टता न वर्तेत - पुनः स्पष्टतया - भाषणमारभते - पदानि वदन्ति-पदे अक्षराणि – द्विप्रकारकाणि- स्वराः- व्यञ्जनानि - स्वरेण सह व्यंजनानि -अक्षराणि - उच्चारण स्थानानि - प्रत्यक्षरं अनेकवारकथनं - अनुकर्तुं प्रेरणा-स्वालित्यनिवारणं - पदानां पाठने क्रमः - द्व्यक्षरपदानि-त्र्यक्षरपदानि चतुरक्षरपदानि - साहाय्यकोपकरणानाम् उपयोगः ।

## विशदीकरणम् (Discussion)

भाषा आशयविनिमया उपयुज्यते । भाष व्यक्तायां वाचि इति धातोः भाषापदस्य निष्पत्तिः ।आङ्गलभाषायां लाङ्गवेज् इति पदमुपयुज्यते । लाटिन् भाषातः लिन्वा इति पदाज्जातं भवति 'लॉग्वेज्' इति पदम्। भाषायां वाक्यानि सन्ति । पदसमूहमेव वाक्यम् । वाक्ये पदानि सन्ति । पदेषु अक्षराणि सन्ति ।

किं नाम अक्षरम् । न क्षरम् क्षीयते इति वा अक्षरम्। नाशरहितः इत्यर्थः। पदानामर्थबोधः वर्तते । प्रत्यक्षरमर्थबोधः न। अस्याक्षरस्यायमर्थः इति बोधः न । तथापि एकाक्षरयुक्तं पदं वर्तते। तादृशानि पदानि विरलानि । प्रत्यक्षरमर्थबोधे सति यूपः 'इत्यत्र यू इत्यस्य कश्चन अर्थः 'प' इत्यस्य काश्चनर्थः इति व्यवस्था न । 'यूपः इत्यक्षरसमुदायस्यैकार्थः। यूपः इत्यस्य जयस्तम्भः यागस्तम्भः क्रमुकः इत्याद्यर्थाः। वर्णसमुदायः पदम् ।

अक्षरमित्यर्थे वर्णः इति पदमुपयुज्यते। वर्णाः द्विधा । स्वराः व्यञ्जनानि च । ह्रस्वस्वराः दीर्घस्वराः चेति विभागद्वयं स्वरस्य ।'अ इ उ ऋ लृ ' इत्येते ह्रस्वस्वराः । आ ई ऊ ॠ ए ऐ ओ औ इत्येते दीर्घस्वराः । व्यञ्जनाक्षराणि त्रिप्रकारकाणि । वर्गाक्षराणि अन्तःस्थाः ऊष्माणः चेति । व्यञ्जनाक्षराणि स्वरसाहाय्येनैव उच्चरति। क ख ग घ ङः इति वर्गाक्षरेषु प्रथमवर्गस्थाः पञ्च अक्षराणि । यथार्थतः ते क् ख् ग् घ् ङ् इत्येव ।स्प ष्टार्थमेव अकारस्य योजनम् । क्+अ-क। ख्+अ-ख। ग्+अ-ग। स्वरेण सह व्यञ्जनानि । उक्तञ्च सिद्धान्तकौमुद्याम् – हकारादिष्वकारः उच्चारणार्थः इति।

अक्षराणां मौखिकाभ्यासः कार्यः । कथम्? प्रथमं गुरुः 'अ' इत्युच्चरति । तदर्थं मुखं विवृणोति । मुखं संवृत्य अ इत्युच्चरितुं न शक्यते । उदरादुत्थितः वायुः कण्ठादिषु भागेषु सञ्चार्य मुखविकसनसमये बहिरागच्छति । तदानीं ' अ' इत्यक्षरस्य शब्दः जायते। अकारोच्चारणाय कण्ठ- स्थानमावाश्यकम् । एवं कवर्गस्य हकारस्य विसर्गस्य स्थानं कण्ठमेव । उक्तञ्च 'अकुहविसर्जनीयानां कण्ठः' इति । अकारोच्चारणसमये वारं वारं'अ' इत्यावर्तनं कार्यम्। छात्रैरनुकर्तुं प्रेरणा देया। छात्राः वदन्तु। यद्यत्र स्वालित्यं वर्तते चेत् अध्यापकेन स्वालित्यं निवार्य शुद्धरूपेण उच्चार्य छात्रेषु अकारस्योच्चारणं व्यक्ततया

दृढीकर्तव्यम् । अनुकरणेन भाषां वशीकर्तुं शक्यते । अपि च अनुकरणप्रियाः भवन्ति बालकाः।

आकारस्योच्चारणे स्थानं कण्ठः भवत्यपि मुखस्य विस्तृतत्वं जायते इति भेदः। अकारमेकमात्रया उच्चरति, आकारे तु मात्राद्वयमस्ति। इकारस्योच्चारणं अकारवत् न भवति।तत्र तालु नाम स्थानम्। मुखस्य विवृतत्त्वमस्ति । ईकारे स्थानं तालु, मात्राद्वयं वर्तते । अध्यापकः उच्चार्य 'अ इ उ आ ई ऊ इत्यादीनां सविशेषताः पाठनीयाः। उकारस्योच्चारणे ओष्ठयोः स्पर्शनमावश्यकम्। उकारस्य पवर्गस्य च स्थानं ओष्ठौ। 'उपूपध्मानीयानामोष्ठौ। लृकारस्योच्चारणवेलायां नासा दन्तानां समीपे आयाति । 'लृतुलसानां दन्ताः इति । ए ऐ - इत्येतयोः स्थानं कण्ठतालु । कण्ठस्य तालुनः च मध्ये भवति । साहाय्यकोपकरणानां साहाय्येन उच्चार्य स्वराणां भेदं छात्रान् बोधनीयम्। ओकारस्य औकारस्य च स्थानं कण्ठोष्ठमेव । तदानीं मुखादागतः वायुः कण्ठे स्पृष्ट्वा ओष्ठयोः वक्रतां च जनयन् बहिरागच्छति । अनुस्वारस्य (o) स्थानं नासिका। विसर्गस्य (:) स्थानं कण्ठमेव।

वर्गाक्षराणि पञ्चविंशतिः । स्पृष्टमिति आभ्यन्तरप्रयत्नः । स्पृष्टं प्रयत्नं स्पर्शानाम्| वर्गाक्षराणां स्पर्शाक्षराणि इति नामापि अस्ति। उक्तञ्च 'कादयो मावसाना स्पर्शाः' इति । कवर्गे वर्तमानात् क' इत्यारभ्य पवर्गान्ते वर्तमानं 'म' इत्यक्षरपर्यन्तम्। यथार्थतः स्पर्शाक्षराणामभावे विरलानि पदान्येव वक्तुं शक्यते।

चित्राणि वस्तूनि वा प्रदर्श्य अक्षराणि पदानि च पाठयितुं शक्यते। चित्रसाहाय्येन दृष्टमक्षरं पदं वा स्मृतिपथे बहुकालं स्थास्यति । यथा अश्वस्य चित्रं प्रदर्श्य 'अ' इत्यक्षरं अश्वः इति पदं च पाठयति चेत् छात्रः अ श्वः इत्युच्चरति, अकारं जानाति। अश्वः, अश्वः इत्युच्चारणेन तं पशुं पदं च प्रत्यवगच्छति।

कस्यचन ऋषेः चित्रं प्रदर्श्य ऋ षिः इत्युच्चरति । 'ऋ' इत्यक्षरं जानाति ऋषिपदं गृह्णाति।अर्थं च जानाति। कस्यचन अंशुकस्य चित्रं प्रदर्श्य अं शु कम् इत्युच्चार्य पाठयति । तथा 'अ-अं' इत्यनयोः उच्चारणभेदं दृढीकर्तुं शक्यते । कस्यचन चक्रस्य चित्रं, चक्रं वा प्रदर्श्य च इत्यस्योच्चोरणं च-क्रं इति वारं वारं उच्चार्य 'च' इत्यक्षरं चक्रमिति पदं तस्यार्थश्च दृढयति।।

एवं डमरुः, नक्षत्रम्, रथः, इत्यादीनि पदानि तत्रत्यानि अक्षराणि, तेषामर्थाः च झटित्यवबोधयितुं शक्यते।

पूर्वोक्तेषु उदाहरणेषु स्वरव्यञ्जनयोः भाषणमिव लेखनमपि सुकरया रीत्या कर्तुं शक्यते। यथा–

अश्वः = अ+श्+व्+अः

ऋषिः = ऋ+ष्+इ + : ।

अंशुकम् = अं+श्+उ+ क् + अम् ।

पुनः व्यञ्जनाक्षरेण साकं स्वरादीनां समायोजनेन वर्तमानं व्यनियानमुच्चार्य पाठनीयम्।

## पुनरावृत्तिः (Recap)

- भाषापठने प्रथमं सोपानं भवति श्रवणम्।
- भाषापठने द्वितीयं सोपानं भवति भाषणम्।
- लाटिन् भाषातः 'लिन्वा' इति पदाज्जातं भवति लांग्वेज् इति पदम् ।
- अकार-आकारयोः उच्चारणे स्थानं कण्ठः सत्यपि आकारोच्चारणे मुखस्य विवृतत्वे विस्तारमायाति ।
- उकारस्योच्चारणे ओष्ठयोः स्पर्शनमावश्यकम्।
- चित्राणि वस्तूनि वा प्रदर्श्य अक्षराणि पदानि च पाठयितुं शक्यते ।
- सस्वरव्यञ्जनयोः भाषणमिव लेखनमपि सुकरया रीत्या कर्तुं शक्यते ।
- व्यञ्जनाक्षरेण साकं स्वरादीनां समायोजनेन वर्तमानं व्यतियानम् उच्चार्य पाठनीयम्।
- पदानामपि पाठने कश्चन क्रमः स्वीकर्तव्यः । सरलात् कठिनं प्रति तत्त्वमुपयोक्तव्यम्।
- प्रथमं संयुक्ताक्षररहितानि स्वरव्यञ्जनाक्षराणि प्रयोक्तव्यानि।पुनः अक्षरद्वयं अक्षरत्रयमित्यादि रूपेण पदानि पाठनीयानि

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भाषापठनस्य द्वितीयं सोपानं किम् ?
2. वर्णाः कतिविधाः?
3. अकार-आकारयोः उच्चारणे कः भेदः?
4. पवर्गस्य उच्चारणस्थानं किम् ?
5. कति व्यञ्जनाक्षराणि ?
6. स्पर्शाः के?
7. केशवः' इति पदे वर्तमानानि स्वरव्यञ्जनानि पृथक् क्रियताम्।

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।

(Answer the following questions in one or two sentences)

1. मकारस्य उच्चारणस्थानं किम् ?
2. अक्षराणां पदानां च पठने किं तत्त्वं प्रयोक्तव्यम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

(Answer the following questions in a paragraph)

1. भाषायाः स्थानं निष्पत्तिं च सूचयत।
2. वर्णानामुच्चारणे श्रद्धेयाः कार्याः के ?

## निर्दिष्टाभ्यासः (Assignments)

1.पदानामक्षराणां च पाठनं कथं कार्यम्?

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. भाषणम्।
2. द्विविधाः।
3. अकार -आकारयोः स्थानं कण्ठमेव, तथापि आकारोच्चारणे मुखस्य विवृतत्वमधिकतया आयाति ।
4. ओष्ठौ।
5. त्रयस्त्रिंशत् व्यञ्जनाक्षराणि।
6. कादयो मावसानः स्पर्शाः ।
7. क्+ए, श्+अ, व्+अः - केशवः ।

## सूचनाग्रन्थाः

1. प्रोफसर् सहदेवः, संस्कृताध्यापनम् (कैरली), नेत्री पब्लिकेषन् अनन्तपुरी, २००२
2. संस्कृतस्वाध्यायः, प्रथमा दीक्षा, वर्णमाला, सम्पादकः वेम्पटि कुटुम्बशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नव देहली, २०१६.

SGOU

# Unit-2

# कथाकथनशिक्षणम्

## उद्देश्यानि (Learning Outcomes)

- संस्कृतमनायासेन प्रयोक्तुं तात्पर्योत्पादनम् ।
- कथानां प्राधान्यमवगच्छति ।
- कथासु अन्तर्लीनस्य तत्त्वस्य ग्रहणम् ।
- कथाकथने श्रद्धेयानां कार्याणां ग्रहणम् ।
- कथाकथने लघुरूपकावतरणे च छात्राः समर्थाः भवेयुः ।

## प्राग्व्यपेक्षाः(Pre requisites)

भाषा मातुः पितुः गृहपरिस्सरात् च बालः पठितुम् आरभत। श्रवणेनैव भाषां वशीकर्तुं शक्यते । श्रुत्वा बाले भाषणाय प्रेरणा जायते । प्रेरणया यावच्छक्तिः बालः भाषितुं श्रमते। प्रथमं अव्यक्ततया भाषणं, पुनः व्यक्ततया च भाषणे कर्तुं प्रभवति । कथां श्रोतुं बालाः उत्सुकाः भवन्ति। कथां पठितुं उत्सुकान् बालान् मधुरभाषणेन मधुरस्वरेण च कथाः श्रावयितव्याः । संभाषणेन भाषायाः नैसर्गिकीं रीतिं ज्ञातुं शक्यते। कथायाः आविष्कारेण कथापठनरीतिं च अवलम्ब्य पाठ्यते चेत् सहसा कथां ग्रहीतुं, तथा कथासु वर्णितान् जीवितयाथार्थ्यं ज्ञातुं सांस्कारिकावबोधं जनयितुं च शक्यते । अतः कथाकथने श्रद्धेयान् अंशानधिकृत्य पठामः ।

## प्रधानांशाः/ प्रधानपदानि (Key words)

कथासाहित्यस्योत्पत्तिः- आबालवृद्धं जनान् तोषयति कथा - संस्कृते कथासाहित्यं सुसम्पन्नम्- सहृदयान् आकर्षयति इति एङ्गर् एल्लन् महाशयः-चरित्रपराणि -जीवितरीतयः - चिन्ताः- सामूहिक सविशेषताः - मातृकापराजीविरीतिः- जीवितस्य अस्थिरता- बालेभ्यः पशुपक्षिकथाः युक्ताः-कथोपककाः संभाषणानि च- सर्वधर्मपोषकाः कथाः- हृदयावर्जकरीत्या कथायाः अवतरणम्-भावानुसारी स्वरपरिवर्तनयुक्ता च - संस्कृतकथानां सविशेषताः- हितोपदेशः- बृहत्कथा - बृहत्कथामञ्जरी -कथासरित्सागरः – कथोपकथनं हृदयावर्जकरीत्या।

## विशदीकरणम् (Discussion)

किं नाम कथा ? वाक्यविस्तारकल्पना कथा इति भरतमुनेराशयः । कदा अजायन्त?

मानवोत्पत्तिना सह कथा: अजायन्त । मानवाः कथाः परस्परं कथितवन्तः । भावनया दृष्टं वृत्तान्तं अन्ये संक्रामयितुं या वाक् उपयुक्ता सा कथा।

कथासाहित्यं स्थिरं वा ?

न, कथासाहित्यं जन्मनः प्रभृति अद्य पर्यन्तं परिवर्तनविधेयं भवति ।
भारतीयकथासाहित्यस्य आविर्भावः संस्कृतभाषातः एव । कथाः मानवानां धार्मिक-सामाजिक- सांस्कारिकाभिवृद्धिं द्योतयन्त्यः भवन्ति। कथाः द्विविधाः । कथा, आख्यायिका चेति। किन्तु आचार्य दण्डी स्वग्रन्थे काव्यादर्शे अमुं भेदं नाङ्गीकरोति । आबालवृद्धं जनं सन्तोषयति कथा । कथायाः सुनिश्चितं दृढं च लक्षणं वक्तुं नैव शक्यते । पण्डिताः कथालक्षणकथने भिन्नमतानुयायिनः भवन्ति । कथा साधनं न, साध्यमेव। कथा चित्तं रञ्जयति इत्यत्र भिन्नमतत्त्वं न।जन्मना एव शिशवः कथाश्रवणे तत्पराः इत्यतः कथासु नीतिबोधं सदाचारनिष्ठता अधिकतया च चित्रिताः।
दार्शनिक-चरित्र-सामूह्यसम्बन्धान् विविधान् घटकान् परिपोषयत् कथासाहित्यं संस्कृते सम्पन्नमेव । जीविताय योग्यान् उपदेशान् प्रदत्तानां कथानां सर्वेषामङ्गीकारः सिद्धश्च। जि.ए योकहान् (G. A. Yoakahan) तथा आर्.जि. सिम्प्सन् (R-G. Simpson) च लिखिते 'अध्यापने आधुनिक - पाठनरीतयः तन्त्राणि च (Modern methods and Techniques in Teaching) इत्यस्मिन् ग्रन्थे सूचितं भवति यत् परिष्करणमूल्ययुक्ताः कथाः स्वीकरणीयाः । यदि काचन कथा सद्गुणसम्पन्ना सा साध्वी एव । यदि सा भाषास्वभावान् आविष्करोति सा श्रेष्ठतरा एव। किन्तु प्रथमत: कथा सद्गुणाश्रया, कथाकथनयोग्या च भवेत् इति।
अमेरिक्कादेशस्थः एड्गर् एल्लन् अभिप्रेति यत्' कथा तु अल्पसमयेन पूर्णतः वाचयितुं योग्या, अनुवाचकानां हृदयमाकृष्टुं योग्या प्रभावोत्पादयितुं पर्याप्ता च भवेत् इति।

### 3.2.1.कथापठनस्य महत्त्वम्

कथा काचन श्रव्यकला भवति । यथार्थजीवितस्य काल्पनिकतायाः च वर्णनया पवित्रीभूता सन्तोषदायिका च भवति । कथापठनेन केचन लाभाः सन्ति ।

1. छात्राणां कल्पनाशक्तेः विकासः।
2. कथासु वर्तमानानि चरित्रपराणि, जीवितशैलिं, चिन्ताधारा, सामूहिकसविशेषताः, लोकोक्तयः महद्वचनानि च ज्ञातुम्।

3. विपुलेन कथासाहित्येन परिचिनोति । न केवलं भारतीयभाषासु किन्तु लोकभाषासु सर्वत्र अनूदितस्य पञ्चतन्त्रस्य आशयाः चिन्ताधाराः च अनुवाचकेषु वर्तनव्यतियानं जनयिष्यन्ति।
4.बृहत्कथा 'बृहत्कथामञ्जरी' कथासरित्सागरं 'वेतालपञ्चविंशतिका इत्यादिषु वर्तमानैः कथाप्रपञ्चैः परिचिताः भूत्वा विश्वसाहित्येन सह तारतम्यं कर्तुमवसरः अनुवाचकेभ्यः कालान्तरे लभते ।
5.जीवितस्य सुन्दरावस्थां दृष्ट्वा मातृकापरां जीवितवृत्तिं चालयितुं प्रेरणा जायते । जीवितस्य अस्थिरतां चावगच्छति।
6. भाषास्वाधीनं, पदसम्पत् संभाषणकला, साहित्याभिरुचिः, मूल्यबोधः इत्यादयः वर्धन्ते।
7. पठनाय, स्वयंपठनाय, विरामावसराणां सदुपयोगाय च प्रेरिताः भवन्ति। कथामाध्यमेन यं कमपि विषयं सोत्साहमवगन्तुं शक्यते।

**3.2.2.कथानां चयनं कथं कर्तुं शक्यते ?**

1.अनुवाचकानां छात्राणां वा आयुषः मनसः च वर्धनानुसारं स्तरानुकूलाः कथाः स्वीकर्तव्याः ।
2. प्राथमिकस्तरासु छात्रेभ्यः परिचितानां पशुपक्षीणां कथाः भवन्तु।
3.उच्चस्तरासु मानसिक-शारीरिकवर्धनानुसारं रुचिकराः जीवितेन सहबद्धाः च कथाः स्वीकर्तव्याः ।
4. कथाः जिज्ञासोत्पादिकाः, आदर्शनिष्ठाः, आनन्ददायिकाः च भवन्तु।
5. कथानां भाषाशैली सुगमा आकर्षका च भवतु।
6. उद्देश्यं सफलीकर्तुं योग्या सद्भावनाजनकाः च भवन्तु ।
7. कथोपकथनं संभाषणसन्दर्भाः च वर्तितव्याः ।
8. छात्राणां भावनां विकासयितुं योग्यं कथान्तं वर्तितव्यम्।
9.उच्चस्तरासु कक्ष्यासु सामूहिक - राष्ट्रिय- ऐतिहासिक कथाभिः साकं यात्राविवरणकथाः महतां जीवितकथाः च वर्तितव्याः। महापुरुषाः कथं महत्पदवीं प्राप्ताः इत्यस्य विवरणमस्ति चेद्वरम्।
10. अन्धविश्वासयुक्ताः भयादायिकाः मनः पीडाजनकाः कथाः वर्जितव्याः।
11.देशीयोद्ग्रथनप्रेरिकाः जनाधिपत्यक्रमस्य पोषकाः धार्मिकाभ्युन्नतियुक्ताः कथाः स्वीकर्तव्याः ।
12.पौराणिकथाभिः साकम् अर्थसम्पुष्टाः चिन्तोद्दीपिकाः आधुनिककथाः परिहासकथाः च वर्तितव्याः।

<u>**3.2.3.कथाकथने श्रद्धेयाः कार्याः**</u>

1.कथाः सुमधुरं कथनीयाः । भाषणे भाषायां च माधुर्यं वर्तितव्यम्।
2.कदाचित् कथामध्ये श्लोकाः स्युः तर्हि श्लोकपठनानुकूलरीतयः स्वीकर्तव्याः।

3.कथां पूर्णतः ज्ञात्वा छात्रेभ्यः उचितस्वरूपेण कथां कथनीयम् ।

4. छात्रेभ्यः रुच्युत्पादनरीत्या कथाविष्करणं कार्यम् ।

5. कथानुसारं भाषणरीतिः प्रयोक्तव्या।

6. स्तरानुसृता भाषा प्रयोक्तव्या।

7. कथाः भावानुसारं स्वरपरिवर्तनेन कथनीयाः ।

8. छात्रेषु सन्दर्भानुसारं एकाग्रतां सक्रियत्वं च स्रष्टुं योग्याः अवसराः वर्तितव्याः ।

3.2.4.**संस्कृतकथानां सविशेषताः ।**

सर्वासु भावासु कथाः सन्त्यपि संस्कृतसाहित्ये वर्तमानानां कथानां काश्चन सविशेषताः सन्ति ।

**1. निश्चितलक्ष्यम्**

निश्चितलक्ष्यमाधारीकृत्यैव संस्कृतसाहित्ये सर्वाः कथाः रचिताः। प्रायः सर्वाः कथाः धर्मार्थकामादीन् लक्ष्यीकृत्यैव रचिताः । विष्णुशर्मणः पञ्चतन्त्रम् तादृशः कश्चन ग्रन्थः । हितोपदेश-बृहत्कथाप्रभृतयः ग्रन्थाः अपि उद्देश्यानां सफलीकरणाय योग्यानि कथाकुसुमानि भवन्ति।

**2. कथावस्तु**

संस्कृतकथानां कथावस्तु प्रायेण क्रमबद्धं जीवितेन सहबद्धं च भवति। तस्मिन् अधोनिर्दिष्टाः गुणाः सन्ति।

क) उद्देश्यशुद्धिः।

ख) कथारचनायां श्रेष्ठत्वम्।

ग) प्रधानमेकं कथापात्रम्।

घ) कस्यचित् प्रश्नस्य परिहाराय समर्थमितिवृत्तम्।

**3. कथोपकथनम्**

एकस्याः कथायाः कथान्तरे प्रवेशनं इति काचन रीतिः प्रायेण पञ्चतन्त्रादिषु कथासु सन्ति। श्रृङ्खलारूपेण कथाः सन्ति । अनेकाः उपकथाः, मध्ये मध्ये सन्ति । प्रथममेकः श्लोकः, तस्य श्लोकस्य आशयसमर्थनरूपा काचन कथा | कथान्ते अपरः श्लोकः ।इत्येवं रूपेण वर्तमाना रचना संस्कृतेतरभाषासु विरलतया एव दृश्यन्ते।

4. <u>भाषाशैली</u>

कथानां भाषाशैली सरला आशयग्रहणाय समर्था च भवति । नदीप्रवाहमिव अनस्यूतं प्रवहमाना काचन रीतिः वर्तते। सूक्तयः महद्वचनानि सदुपदेशाश्च ललितभाषायामेव प्रतिपादिताः। कथासु अन्तर्लीनं गुणपाठं आदर्शशुद्धिः च प्रधानतया परिगणितव्याः। कथाकथनशिक्षणे कथायाः संक्षिप्तं रूपं प्रथमं सूचयति । कथासारं, तत्रत्यं गुणपाठं उपदेशं वा विशदयति। आदर्शवाचनं करोति । अनुवाचनाय छात्रान् निर्दिशति। अनुवाचनसमये सम्भूतान् स्खालित्यान् निवारयति । प्रत्यनुच्छेदं आशयं विशदयति । कठिनपदानामर्थं विशद- यति। व्याकरणककार्यं सूचयति । मध्ये मध्ये प्रश्नान् पृच्छति। प्रश्नानामुत्तरदाने छात्रेभ्यः पर्याप्तं साहाय्यं ददाति।

आशयविशदीकरणसमये लघुलघुवाक्यानि अध्यापकः वदति । दीर्घं वाचकं वर्तते चेत् तत् अनेकवाक्यानि कृत्वा विशदयति। पाठभागं सम्पूर्णे, छात्रैः अवगतं वा नवेति ज्ञातुं पुनरावृतिप्रश्नान् पृच्छति। तत्रापि उत्तरदानेऽसमर्थं छात्रं साहाय्यं कृत्वा पाठयति। एवं पदानां वाक्यानां क्रियापदानां च सविशेषताः कथयित्वा कथायाः सारांशं च संसूच्य रसावहरूपेण पाठयति।

| कृतयः | कर्तारः |
|---|---|
| पञ्चतन्त्रम् | विष्णुशर्मा |
| हितोपदेशः | नारायणपण्डितः |
| बृहत्कथा | गुणाढ्यः |
| बृहत्कथामञ्जरी | क्षेमेन्द्रः |
| कथासरित्सागरः | सोमदेवः |

## पुनरावृत्तिः (Recap)

- वाक्यविस्तारकल्पना कथा।
- आबालवृद्धं जनं कथा तोषयति ।
- प्राथमिकस्तरासु छात्रेभ्यः परिचितानां पशुपक्षीणां कथाः पठनाय देयाः।
- पौराणिककथाभिः साकं अर्थसम्पुष्टाः चिन्तोद्दीपिकाः आधुनिककथाः परिहासकथाः चोपयोक्तव्याः।

- कथासु अन्तर्लीनं गुणपाठम् आदर्शशुद्धिः च प्रधानतया परिगणितव्याः ।

**वस्तुनिष्ठप्रश्नाः (Objective type questions)**

1. कदा कथाः आविर्भूताः?
2. 'एड्गर् एल्लन्' महाभागस्य मते का नाम कथा ?
3. कथापठने किं किं वर्धन्ते?
4. पञ्चतन्त्रस्य कर्ता कः?
5. पाठभागे संपूर्णे अध्यापकेन पाठितं कथाभागं छात्रैरवगतं वो नवेति ज्ञातुं किं करणीयम्?

**एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।**

(Answer the following questions in one or two sentences)

1.प्राथमिकस्तरे छात्रेभ्यः कीदृशकथाः पठनाय देयाः ?
2.कथासु प्रधानतया किं परिगणितव्याः ?

**एकैकयाखण्डिकया उत्तराणि लिखत।**

**(Answer the following questions in a paragraph)**

1. कथायाः महत्त्वं सूचयत ।
2. कथानां चयनं कथं कर्तव्यम्?
3. संस्कृतकथानां सविशेषताः काः ?

**निर्दिष्टाभ्यासः(Assignment)**

1. संस्कृतकथानां सविशेषताः पञ्चतन्त्रमाधारीकृत्य निरूपयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मानवोत्पत्तिना सह
2. कथा तु अल्पसमयेन पूर्णतः वाचयितुं योग्या, अनुवाचकानां हृदयानाकृष्टं योग्या, प्रभावोत्पादयितुं पर्याप्ता च भवेत्।
3. भाषास्वाधीनं, पदसम्पत्, संभाषणकला, साहित्याभिरुचिः मूल्यबोधः इत्यादयः वर्धन्ते ।
4. विष्णुशर्मा ।
5. पुनरावृतिप्रश्नान् पृष्टव्याः।

## सूचनाग्रन्थाः


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखंबा कृष्णदास् अकादमी, वाराणसी २०१६
2. प्रोफ.सहदेवः, संस्कृताध्यापनम् (कैरली), नेत्री पब्लिकेशन्स्, अनन्तपुरी २००१

# Unit-3

# वार्तावाचनशिक्षणम्

## उद्देश्यानि (Learning outcomes)

- संस्कृतमनायासेन सम्भाषणं करोति ।
- वार्ताः श्रुत्वा आशयग्रहणम्।
- संस्कृतभाषायां समाचारपठनस्य लाभान् अवगच्छति।
- समाचारपठने श्रद्धेयान् कार्यान् गृह्णाति।
- वार्तावाचने छात्राः समर्थाः भवेयुः ।

## प्राग्व्यपेक्षाः (Pre requisites)

श्रवणं भाषणं वाचनं लेखनं इति चत्वारि सोपानानि भाषापठने सन्ति। संस्कृतपठनेऽपि इयमेवावस्था ।संस्कृतं यथेष्टं श्रुत्वा भाषणाय प्रेरितो भूत्वा लघुलघुवाक्यानि वा भाषितुं यतते बालः। मातुः पितुः विद्यालयस्य च सकाशात् भाषां श्रुत्वा क्रमेण आकाशवाण्याः च भाषामाकर्णयति। आकाशवाण्या वार्ताः आकर्ण्य भाषायाः यथार्थं स्वभावं जानाति। जीवनयुक्ता भाषा भवति आकाशवाणीतः जायमाना भाषा तस्यां कृत्रिमत्वं न ।समाचारपत्रेषु वार्ताः कथं क्रोडीक्रियन्ते समाचारपठनस्य लाभाः के इत्यादिकमस्मिन् एकके पठामः।

## मुख्यविचारः (Key words)

समाचारपत्रस्य प्राधान्यं – वार्ता इत्यस्य आङ्गलपदं -news इति पदस्य सविशेषता - लोके संभूयमानं कार्यं पूर्णतः ज्ञातुं - समाचारपठनस्य लाभाः - पदावलीग्रहणं - सन्दर्भस्य संस्कृतेः चावगमः-बोधकौशलस्य संवर्धनं - भाषायाः संरक्षणम् समालोचनात्मकाचिन्तायाः प्रेरणा – क्रियात्मकचिन्तायै प्रेरणा – समाचारपत्रवार्तां प्रति प्रतिफलनं -अनुवादनकौशलस्य अभ्यासः - वार्तावाचने - नाम- क्रिया- विशेषणानां योजनं - भाषाघटना- प्रामाणिकानां समाचारस्रोतसामुपयोगः- भाषायाः व्याकरणस्य च समावेशः - समग्रविज्ञानग्रहणं - मौखिकपठनस्य उच्चारणाभ्यासस्य च प्रोत्साहनं - इतरेषां समाचाराणां विशेषताग्रहणं - संस्कृतिसम्बद्धस्य सन्दर्भस्य समावेशः- संस्कृतभाषायां लेखनं स्पष्टीकरणं च- मल्टिमीडियायाः तन्त्रस्य चोपयोगः ।

## विशदीकरणम् (Discussions)

मानवः काश्चन समूहजीविः भवति । मानवाः परस्परम् आश्रित्य जीवन्ति । एकान्ततया जीवितुं केचन तत्पराः। किन्तु तादृशाः जनाः विरलाः । मानवः स्वस्य व्यक्तित्वप्रकाशनाय इच्छति । सः अङ्गीकारं प्राप्तुमभिलषति। इतरे कथं जीवन्ति, समीपस्थाः प्राणिनः कथं वर्तन्ते इति ज्ञातुं ताल्पर्यं वर्तते। पुरातनकाले जनानां बाहुल्याभावात् सर्वेषां दैनन्दिनकार्यं ज्ञातुं शक्तमासीत्। किन्तु जनानां बाहुल्यात् सर्वेषां कार्यं गृह्णातुं न शशाक । तदर्थं नूतना काचन पद्धतिः मानवैः आरब्धा। समाचारपत्राणां प्रभावः तदा संजातः। समाचारः इत्यस्य आङ्गलपदं भवति न्यूस् (News) इति।

किं नाम न्यूस् (news)? आङ्गलपदे News इत्यस्य North,East,West, South इत्येतेषां आङ्गलेयपदानां प्रथमाक्षराणां समायोज्य news इति रूपं संजातम्। अर्थात् सर्वासु दिक्षु वर्तमानाः कार्याः पत्ररूपेण प्रतिदिनमस्माकं पुरतः यत् विस्तारयति तदेव समाचारपत्रम्।

समाचारपत्रे तु प्रतिदिनं प्रायेण प्रभाते अस्मभ्यं सकाशं प्राप्नोति । तस्य वाचनं कार्यम् । तदर्थं विद्यार्जनं कार्यम् । केवलं श्रवणेन कार्यग्रहणाय आकाशवाणीतः वार्ताश्रवणेन शक्यते। तत्र वार्तावाचनाय शिक्षणं आवश्यकम्। संस्कृते पत्रवाचनेन संप्राप्तुं योग्या: लाभाः अधिकाः । तेषु केचन अधोनिर्दिष्टाः भवान्ति।

**1. पदस्वाधीनतावर्धनम् (Expanding vocabulary)**

पत्रवाचनेन विविधैः पदैः साकं सम्पर्कं कर्तुं शक्यते । साधारणतया उपयुक्तानि पदानि, तान्त्रिकपदानि भाषायां शास्त्रेषु च वर्तमानानि साङ्केतिकानि च ज्ञातुं शक्यते। अपि च नूतनं कमपि लोकं प्रविष्टमिव कांचन प्रतीतिमुत्पादयति । एवं पदस्वाधीनताशक्तिः वर्धते।

**2. संस्कृतिज्ञानाम् (understanding Culture)**

समाचारे स्वदेशस्य संस्कृतेः समाजस्य च प्रतिबिम्बं दृश्यते। संस्कृतवार्तावाचनेन छात्रैः चरित्रपराणि कार्याणि ग्रहीतुं शक्यते। परम्परागतरीतिं तात्कालिकावस्थां च ज्ञातुं शक्यते।

**3. ग्रहणपटुता (Enhancing comprehension)**

नूतनविज्ञानार्जनाय समाचारः पाठकान् प्रेरयति। तथा जटिलान् सूचनान् ग्राहयितुं प्रेरयति। तादृशः अभ्यासः बोधकौशलं वर्धते । संस्कृतव्याकरणं वाक्यघटनां च छात्रेभ्यः पठनाय साहाय्यकं भवेत्।

**4. भाषायाः संरक्षणम् (Preserving the language)**

संस्कृते वार्तालेखनेन भाषायाः निरन्तरोपयोगः जायते । भाषा सजीवा भवति। उपयोगेनैव भाषा सुरक्षिता ।

**5. निरूपणात्मकचिन्तायै प्रेरणा (Encourage Critical thinking)**

समाचारवार्ताः चित्रिताः कथाः च कदाचित् साधारणचिन्तया अवगन्तुं प्रयासकराः भवेयुः। तदानीं निरूपणात्मकचिन्तया तस्य समाधानमपि द्रष्टुं श्रमः क्रियते।वास्तविकघटनाभिः भिन्नानां तादृशानां कथानां तर्कचिन्तया विवादेन परस्परचर्चया मूल्याङ्केन वा समाधानं पश्यति । एवं चिन्ताः जागरितुं संस्कृते वर्तमानाः समाचारवार्ताः प्रेरयन्ति।

**6. विशदीकरणपरिशीलनम् (Practicing interpretation)**

पत्रवार्ताः विविधचर्चाः उत्पादयितुं कदाचित् प्रेरयेयुः। संस्कृतवार्तां वाचयित्वा छात्रेभ्यः शक्त्यानुसारं व्याख्यानाय अवसरः देयः। तथा अनुवाचनाय च पर्याप्ताः अवसरः लभते । छात्राणां व्याख्यानकौशलं परावर्तनपाटवं च प्रकटयितुं प्रेरणा लभते ।

एते लाभाः न केवलं भाषाप्राप्तौ सहायकाः अपि तु संस्कृतेः ऐतिहासिकस्य च विज्ञाने साहाय्यकाः भवन्ति।

**3.3.1.संस्कृते समाचारपठनस्य शिक्षणे श्रद्धेयाः कार्याः**

संस्कृतभाषायां समाचारपठनस्य शिक्षणाय अनेके प्रमुखविचाराः सन्ति। यैः छात्राःसमाचारसम्बद्धान् कौशलान् सम्यक् आत्मसाक्षात्कर्तुं साधयन्ति । तेषु प्रमुखाः यथा-

**1. साधारणपदावलिना लेखनारंभः कार्यः (start with Basic vocabulary)**

वार्तांशेषु साधारणतया प्रयोगे वर्तमानानि पदानि प्रयुज्यताम्। समाचारलेखनेषु प्रयुक्तान् सामान्यशब्दान् परिचाययतु। मुख्यनामपदानि, क्रियापदानि विशेषणादि चावगमयतु । विशेषणविशेष्यबन्धं सम्यक्तया जानातु। संस्कृतभाषायां सरलवाक्यानि, संयुक्तवाक्यानि, जटिलवाक्यानि च शिक्षयतु।

**2. प्रामाणिकानां समाचारस्रोतसामुपयोगः (use authentic News Sources)**

प्रामाणिकाः समाचारवार्ताः सम्पादयतु। ताः आधिकारिकाः भवन्तु। समाचारशिक्षणाय संस्कृतभाषायां प्रचलितान् प्रामाणिकान् श्रोतसः सम्पादयतु।अन्तर्जालानि प्रसरणानि वा अन्वेष्टव्यानि । छात्राः विविधासु शैलीसु परिचिताः भवन्तु । तदर्थं अनेकानि लेखनानि पठन्तु ।

**3. व्याकरणस्य भाषानियमानां च समावेशः (Know grammar and language rules)**

भाषायाः संवर्धनमिव व्याकरणेऽपि व्यतियानं जायते । भाषा तत्तत्कालीना भवति । भाषायै भवति व्याकरणम्। अत: वर्तमानं व्याकरणं तथा भाषायां नूतनया संजाताः प्रगतयः च छात्रैः ज्ञेयाः।

शुद्धा भाषा प्रयोक्तव्या इति कार्ये संशयः न । विभक्तिनिर्णये सन्धिकार्ये क्रियायां लकारादिषु च श्रद्धा देया। शुद्धभाषप्रयोगाय छात्रेभ्यः तत्तद्विषये पर्याप्तं परिशीलनं देयम् ।

**4. व्याख्यानपाटवसंवर्धनम् (Develop comprehensive skills)**

अनुच्छेदानां श्लोकानां वा व्याख्यानाय पर्याप्तं पाटवं छात्रेभ्यःसिद्ध्यति। विषयस्य सन्दर्भस्य च प्राधान्यं छात्रैः ज्ञातव्यम्। प्रधानांशं ज्ञातुं संग्रहीतुं कदाचित् विशदीकर्तुं च योग्या नैपुणिः वर्तितव्या । अन्तर्गतांशान् व्यङ्ग्यार्थं च छात्राः जानन्तु।

**5.मौखिकाभ्यासस्य साधूच्चारणाय च प्रोत्साहनम् (Encourage oral reading and pronunciation)**

उच्चैः वार्तां वाचयितुं पर्याप्तः छात्रेभ्यः प्रेरणा देया। उच्चारणे शुद्धतां वेगतां च जनयितुं शक्यते। आवश्यकं चेत् मध्ये मध्ये वरिष्टैः संस्कृताभिज्ञैः वार्तावाहकैः साहाय्यं दीयताम्। वार्तावाचनसमये स्खालित्यं वेगताभावः अधिकः वेगता अव्यक्तता च न भवेयुः । तदर्थं पर्याप्तं परिशीलनं देयम्। स्वरप्राधान्ये च श्रद्धा देया । वार्तावाचने कृत्रिमत्वं न संभवेत्।

**6. समाचाराणां विशेषसंरचनां शिक्षयतु (teach News specific conventions)**

वार्ताणां विशिष्य प्रधानवार्तानां घटनां, सविशेषतां सविशदं ज्ञात्वा वाचयतु । प्रथमं प्रधानवार्ताः। अनन्तरं एकैकां सविस्तरं प्रतिपादयतु। पत्रकारतन्त्रस्य परम्परायां वस्तुनिष्ठता, स्पष्टता संक्षेपता च सन्ति। ताः अधिकृत्य मध्ये मध्ये चर्चा कार्या।

**7.वार्तासु संस्कृतिसम्बद्धस्य सन्दर्भस्य समावेशः। (Interpret current events with cultural issues)**

योग्यान् समाचारलेखान् संस्कृतिसम्बद्धेन वाक्येन महद्वचनेन वा समायोजयतु । तेन छात्राणां ज्ञानं प्रासङ्गिकं च भवेत्। संस्कृत- समाचारः सामाजिकराजनैतिकसांस्कृतिक नियमान् विषयान् कथं प्रतिबिम्बयति इत्यस्य चर्चा प्रचालयतु ।

**8. संस्कृतभाषायां लेखनं विशदीकरणं च ददातु (Practice Writing and reporting in Sanskrit)**

छात्राः संस्कृतभाषायां स्वीयान् समाचारलेखान् लिखन्तु। विशदीकरणं च लिखन्तु। एतत् छात्राणां सर्गवैभवं वर्धयति। छात्राः भाषायाः घटनायां व्याकरणे पदावलीवर्धने पदोपयोगे च समर्थाः भवन्तु। आवश्यकं चेत् पर्याप्तं साहाय्यकमपि दीयताम्।

**9.मल्टिमीडियायाः तन्त्रज्ञानस्य चोपयोग: (use multimedia and technology in training)**

शिक्षणं रुचिकरं कर्तुं दृश्यश्रव्योपकरणानां ऐ सि टि साध्यताः चोपयुज्य अभ्यासस्य रचना कार्या। विशेषतः डिजिट्ल्संसाधनानि अन्तर्जालानि आप्स् च इत्यादिकानि प्रयुज्यन्ताम्।

## पुनरावृत्तिः (Recap)

- शब्दान् अनेकवारं श्रुत्वा अनुकरणाय बालकाः प्रेरकाः भविष्यन्ति ।
- लोके संभूयमानं कार्यं पूर्णतः ज्ञातुं समाचारपत्राणि साहाय्यति ।
- प्रामाणिकानां समाहारस्रोतसामुपयोगः कार्यः ।
- पत्रवाचनेन विविधैः पदैः साकं सम्पर्कं प्राप्तुं शक्यते।
- समाचारे स्वदेशस्य संस्कृतेः समाजस्य च प्रतिबिम्बं दृश्यते ।
- नूतनविज्ञानार्जनाय समाचारः पाठकान् प्रेरयति ।
- भाषायाः संवर्धमिव व्याकरणेऽपि व्यतियानं जायते ।
- अनुच्छेदानां श्लोकानां वा व्याख्यानाय पर्याप्तं पाटवं छात्रेभ्यः सिद्ध्यति ।
- वार्ताणां विशिष्य प्रधानवार्ताणां, घटनां सविशेषतां च सविशदं ज्ञात्वा वाचयतु ।
- शिक्षणं रुचिकरं कर्तुं दृश्यश्रव्योपकरणानां ऐ सि टि साध्यताः चोपयुज्य अभ्यासस्य रचना कार्या।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भाषापठनस्य सोपानानि कानि ?
2. आङ्गलपदस्य News इत्यस्य सविशेषता का?
3. पत्रवाचनार्थं किं कार्यम् ?
4. पत्रवाचनेन कीदृशानि पदानि स्वायत्तीकर्तुं शक्यते ?
5. भाषा कथं सजीवा भवति ?
6. समाचारवाचनाय अवश्यघटकः कः?
7. भाषाव्याकरणयोः मध्ये कस्याधिकं प्राधान्यम्?
8. वार्तावाचनाय कीदृशी नैपुणी सम्पादनीया ?
9. संस्कृतभाषायां वार्तावाचनाय किं किं कार्यम् ?
10. शिक्षणं रुचिकरं कर्तुं किं करणीयम्?

## एकेन वाक्येन द्वाभ्यां वाक्यभ्यां वा उत्तराणि लिखत।

(Answer the following questions in one or two sentences)

1. किम् आर्जनाय समाचारः पाठकान् प्रेरयति ?
2. समाचारे केषां प्रतिबिम्बं दृश्यते ?

## एकैकया खण्डिकया उत्तराणि लिखत।

(Answer the following questions in a paragraph)

1. पत्रवाचनेन संप्राप्तुं योग्याः लाभाः के ?
2. संस्कृते समाचारपठनस्य शिक्षणे श्रद्धेयाः कार्याः के ?

## निर्दिष्टाभ्यासः (Assignment)

1. वार्तावाचनशिक्षणस्य प्राधान्यं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. श्रवणं, भाषणं, वाचनं, लेखनं च।
2. North, East, West, South इत्येतेषाम् आङगलेयपदानां प्रथमाक्षराणि समायोज्य news इति रूपं संजातम्।
3. विद्यार्जनम्।
4. साधारणतया उपयुक्तानि पदानि तान्त्रिकपदानि साङ्केतिकपदानि च।
5. निरन्तरोपयोगेन।
6. पदावलीपरिचयः।
7. भाषायाः।
8. व्याख्याननैपुणी (Develop comprehensive skill)
9. स्वीयान् समाचारलेखान् लिखन्तु, विशदीकरणं च कुर्वन्तु।
10. मल्टिमीडियायाः अन्तर्जालस्य आप्प्सां चोपयोगः कार्यः।

## सूचनाः

1. Benefits of news Reading in Sanskrit - news in the internet.
2. Ideas to be considered for training for news Reading- News on the internet.

SGOU

# Unit-4

# संभाषणशाला - द्वितीया स्तरीया

## उद्देश्यानि (Learning outcomes)

- संस्कृतमनायासेन भाषते ।
- भाषामाकर्ण्य आशयग्रहणपाटवं वर्धते ।
- भाषायाः प्रयोगाय सम्भाषणशालायाः सदुपयोगः ।
- सम्भाषणशालारूपीकरणे श्रद्धेयान् कार्यानवगच्छाति ।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतभाषा, अतिपुरातना भाषा भवति । सा आधुनिका भाषा च । लोके इतःपर्यन्तं वर्तमानानि साहित्यरूपाणि शास्त्रतत्त्वानि साङ्केतिकविज्ञानं च संस्कृतभाषायाम् अन्तर्हितानि भवन्ति। आधुनिकोपकरणानां साहाय्येन अनुदिनं प्रवर्धमाना इयं भाषा साधारणजनानां भाषा एव। लोके प्रायेण सर्वासु भाषासु संस्कृतस्य स्वाधीनं वर्तते। पूर्वम् इयं भाषा कठिना इति विश्वासः अवर्तत। अधुना आधुनिकोपकरणानां साहाय्येन ललिता सरला च भाषा भवति। तदर्थं साहायकरूपाः शिल्पशीलाः वर्तन्ते।

अस्य पत्रस्य प्रथमे भागे, श्रवणं इत्यस्मिन् भागे, चतुर्थे एकके सम्भाषणकार्यशाला-प्रथमस्तरीया इत्यत्र कानिचित् कार्याणि विशदीकृतानि। तत्र ललितरीत्या भाषणसहाय्यकयुक्तानि उपकरणानि सन्ति। अस्मिन् भागे द्वितीयस्तरीयां सम्भाषणाशालामधिकृत्य कानिचित् कार्याणि पठामः।

## प्रधानांशाः/ प्रधानपदानि (Key words)

इन्दियार्थसन्निकर्षं- अधिकेन्द्रियसहयोगः- श्रवणेन श्रोत्रेन्द्रियः मनश्च - दर्शनेन चक्षुरिन्द्रियः मनश्च-वारं वारं श्रवणेन दर्शनेन आवर्तनेन द्रढीकरणम् - कानिचित् दृश्यश्रव्योपकरणानि - दर्पणं - दूरदर्शनं - आकाशवाणी-वार्तापत्राणि - सामाजिकमाध्यमानि-वारिका-द्वैवारिका - मासिका- सोद्देश्ययात्रा (field trip) - अधिजालग्रन्थालयः (online library)-

अमूर्तकक्ष्या (Virtual classroom)- सङ्कणकयन्त्रम् (अभिलेखनयन्त्रम्) - लाप्टोप् स्वयंवाहविद्या (automation)

## विशदीकरणम् (Discussions)

प्रत्यक्षादीनि प्रमाणानि। इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षम् । प्रत्यक्षादिभिः प्रमाणैः वस्तुनः स्थिरत्वं (स्थायित्वं) अङ्गीक्रियते । इन्द्रियाणां मनसः च सन्नियोगेन ज्ञानमुत्पद्यते। एकं पदं श्रुणोति। तदर्थं श्रवणेन्द्रियं साहाय्यति। श्रवणेन्द्रियेण श्रुतं पदं मनसि पतिष्यति चेत् तद्पदं श्रुणोति इति वक्तुं शक्यते। मनः तस्मिन् समये अन्यत्र आसीत् चेत् श्रुतमपि अश्रुतवत् प्रतिभाति। एकेन्द्रियसहयोगात् अधिकं स्थिरं भवति। इन्द्रियद्वयसन्नियोगेन लभ्यमानं ज्ञानम्। अधिकेन्द्रिसहयोगेन यज्ज्ञानं लब्धुं तत् चिरस्थायि भवति । अतः श्रवणेन दर्शनेन आवर्तनेन च पाठभागस्य विषयस्य वा पठनं दृढं भवति। अतीतकाले वर्तमानेषु विद्यालयेषु श्यामफलकमेव आसीत् मुख्यं सहाय्यकोपकरणम्। अधुना अनेकानि दृश्यश्रव्योपकरणानि पठनसहाय्यकत्वेन वर्तन्ते।

दर्पणं नाम उपकरणम् अक्षराणामुच्चारणावसरेषु साहाय्यकं भवति । पदानां अक्षराणां वा उच्चारणसमये छात्राः अध्यापकस्य आनने अवलोकयन्तु। उच्चारणवेलायां मुखे संभूतं व्यतियानं पश्यतु। तादृशं व्यतियानं छात्रस्योच्चारणसमये संभवति वा नवेति स्वयं परिशोधयतु। साधूच्चारणपर्यन्तं दर्पणमवलोक्य उच्चारणं कार्यम्। मध्ये मध्ये एतादृशपरीक्षणं साधूच्चारणाय सहायकं भवति।

ग्रामफोन् (Gramophone) नामोपकरणमपि संगीतादीन् विषयान् पाठयितुं साहाय्यकमेव । स्वनग्राहियन्त्रमिति तस्य संस्कृतनाम । तस्मिन्, आदर्शात्मकरूपेण साधूच्चारणपूर्वकं यतितालयात्मकं अभिलेखं कृत्वा (record) पुनः श्रवणाय स्विच्(switch) नुदति चेत् यथेच्छं पद्यानि संगीतं वा श्रावयितुं शक्यते । अनेन अयमपि लाभः वर्तते यत् छात्रस्य नैपुण्यानुसारं पठनायावसर: लभते । विरामावसरेषु अथवा यदा समयः सिद्ध्यति तदा पठितुं शक्यते । स्वनग्राहियन्त्रोपयोगे वैद्युतेरावश्यकता नास्ति। स्वनग्राहियन्त्रं शब्दान् स्पन्दनद्वारा संग्रह्य ( through vibration) सूचिकायाः चलनेन प्रवर्तते ।

सङ्गणकयन्त्रपरीक्षणशाला मात्- आदर्श-संस्कृतमहाविद्यालये वर्तते। तत्र पाठ्यक्रमे पाठ्यचर्चायां च सङ्गणकाधारिताः मृदुकौशलानि (soft skills) छात्रेभ्यः पठनाय वर्तन्ते। एतादृशानि महाविद्यालयानि भारते अनेकत्र सन्ति । सङ्कणकाधारिताः, पठनक्रमाः इदानीं भारते प्रायेण सर्वत्र प्रचलति। एकस्मिन्नेव समये दृष्टुं श्रोतुं च अवसरः लभते । विज्ञानस्य सर्वेषु मण्डलेषु जायमानानि कार्याणि तस्मिन्नेव समये ज्ञातुं शक्यते। मानवान् आह्लादयितुं

पर्याप्तानि कार्याणि -काव्य-नाटक-हास्य-विज्ञान-दैनन्दिनकार्य-प्रभाषणादीनि चित्रैः साकम् अस्मत्पुरतः वर्तते। नूतनमेकं प्रपञ्चमिव। पठनपाठनप्रक्रियासु सङ्गणकयन्त्रस्य स्वाधीनता अधिकतया वर्तते।

दूरदर्शनमेकं दृश्यश्रव्योपकरणमेव दैनदिनजीविते अनिवार्यकार्यक्रमाः दूरदर्शनेन द्रष्टुं श्रोतुमास्वदितुं च शक्यते। आकाशवाणी तु किमपि श्रव्योपकरणमेव । विज्ञानदायिनी भवतीयम् । वार्ताः नाटकादीनि य आकाशवाणीतः श्रोतुं शक्यते। आनन्ददायिन्याः अस्याः प्रयोगः पठनपाठनक्रियासु प्रयुज्यते । श्रवणकाले आशयबोध: न जायते चेत् पुनप्रेक्षणेन आशमवगन्तुं शक्यते।

पत्रमाध्यमादीनां प्रचारणेन न केवलं वार्ताः किन्तु भाषायाः प्रयोगः अधिकतया जायते। नैसर्गिकरीत्या वर्तमानायाः भाषायाः स्वरूपं ज्ञातुं, समूहे वर्तमानानां विविधानां जनविभागानां भाषाप्रयोगं च ज्ञातुं शक्यते । पत्रमाध्यमेषु ये प्रवर्तकाः सन्ति तेषां भाषाप्रयोगं, कालान्तरे भाषायां संजातं व्यतियानं च ज्ञातुं शक्यते। वार्तामाध्यमेषु वारिकाः द्वैवारिकाः मासिक्यादयः अन्तर्भवन्ति । सुधर्मा नाम किमपि वार्तापत्रं संस्कृते इदानीं प्रचलति। संस्कृतस्य प्राणनाडीरूपेण पत्रमिदं शोभते।

समाजस्य स्फुरणमेव माध्यमिकपत्रेषु दृश्यते। जनानां जीवितरीतिम् आचार्यमर्यादीन् च तेषु विशदीकुर्वन्ति। जनमध्ये सौहार्दं जनयितुं परस्परं मानयितुं च प्रेरणां ददाति । प्रादेशिकभाषासु इव संस्कृतेऽपि अनेका: मासिक्यः प्रचलन्ति। रसना, भारतमुद्रा, संभाषणसन्देशः इत्यादिनी मासिक्यः च प्रचारे सन्ति।

संस्कृतप्रचारणाय संभाषणचातुरीवर्धनाय चोपयुक्तमाना अन्या काचन सरणिः भवति सोद्देश्यमात्रा (field trip)। संस्कृतज्ञाः संस्कृतपठने इच्छावन्तः छात्राः वा अत्र एकीभूय प्रतिवर्षं यात्राद्वयं क्रियते चेद्वरम्। यात्रासु सर्वत्र संस्कृतभाषा भाषणीया इति नियमः कार्यः। एवं चेत् यात्रायाः अभ्यन्तरे बहूनि पदानि प्रयोक्तुमवसरः आयाति, अनेके सन्देहाः परिहर्तुमवसरः च जायते । भाषा श्रवणाय भाषाप्रयोगाय अस्य पदार्थमुद्दिश्य इदं पदमेव प्रयुज्यते इत्यतः पदस्वाधीनता शक्तिः वर्धते।

मित्रैः बान्धवैः अन्यै: च सह संस्कृतभाषणाय प्रयोगाय च अधिजालसम्पर्क: (online contact) साहाय्यकं भवाति। यदा विरामावसरः जायते तदा अधिजालद्वारा सुहृद्भिः आशयविनिमयः कार्यः । तदर्थं अधिजालग्रन्थालयस्य (online library) साहाय्यं स्वीकर्तव्यम्। ग्रन्थालयेषु वर्तमानेभ्यः अधिकान् ग्रन्थान् अधिजाल ग्रन्थालयसम्पर्केण परिचाययितुं शक्यते । अपि च सूचनाग्रन्थान् निरीक्षितुं पठितुं चावसरं सिद्ध्यति ।

अमूर्तकक्ष्यायाः (Virtual classroom) उपयोगोऽपि संस्कृतसम्भाषणपठने नितरामुपकारकम्। अमूर्तकक्ष्या तु अमूर्त-यथार्थ-पेटिकायाः (Virtual reality box) साहाय्येन ज्ञानमार्जयितुं शक्यते। अस्याः कक्ष्यायाः अधोनिर्दिष्टाः लाभाः सन्ति।

1. कक्ष्याकर्मं यस्मिन् कस्मिन्नपि स्थले समये च कर्तुं शक्यते । पारम्पर्यविधौ निश्चितकालं निश्चितसमयं चावश्यकम्। अत्र तु छात्रस्येच्छानुसारं पठितुं शक्यते ।
2. घटनां कर्तुं स्वातन्त्र्यम् (Combination of structure and freedom)
   एकस्मिन् वारे कर्तव्यानि कार्याणि छात्रस्य इच्छानुसारं समयानुसारं च कर्तुं शक्यते । पठितुः इच्छानुसारं अवतरणं घटनायाः रूपीकरणं, परीक्षणं, गृहकार्यादिकं कर्तुमवसरः लभते । अस्मिन् दिने इदमवश्यं कर्तव्यमिति निर्बन्धबुद्धिः न ।
3. युक्तिपूर्वं समयनियन्त्रणम् (Effective time management)
   पठितुरिच्छानुसारं समयक्रमीकरणं कर्तुं शक्यते । विद्यालये, कलाशालायां वा गमनस्य नियन्त्रणं वर्तते । अवश्यं चेद् यात्रा कार्या ( स्वयंनियन्त्रणेन समयलाभः सिद्ध्यति । एवं स्वयमेव सर्वं निश्चिनोति इत्यतः आत्मविश्वासः जायते । रूपीकरणतन्त्रे (planning strategy) निपुणः च भवेत्।
4. प्रपञ्चवीक्षणं लभते (Expanded worldview)
   छात्रेण ज्ञातुं शक्यते यत् प्रपञ्चेऽस्मिन् वर्तमानाः छात्राः किं कुर्वन्ति, कथं कुर्वन्ति, कियत्पर्यन्तं कालं तदर्थं विनियुज्यते इत्यादिकानि कार्याणि तदनुकूलरूपेणैव मयापि कार्यः कर्तव्यः इति चिन्ता जायते। मम प्रवृत्तिः मत्सदृशानां कर्मणः कदापि न्यूनं न भवेत् इति । इतरेषां जनानां अस्मिन् कार्ये वर्तमानं वीक्षणं तात्पर्यं अभिरुचिः नैपुण्यादिकं च ज्ञातुमवसरः सिद्ध्यति।
5. इतरैः साकं चर्चितुमवसरः(Discussions with others)
   मम प्रवर्तनस्य कार्यं वरिष्ठैः जनैः सहपाठिभिः इतरसर्वकलाशालाछात्रैः वा चर्चां कृत्वा साधुरीत्या क्रमीकर्तुं तथा तारतम्यपठनं च कर्तुं शक्यते।
6. मूल्यनिर्णये सहसा स्पर्शावबोधः (Immediate feedback in texts)
   मूल्यनिर्णये स्वालित्यदर्शने सहसा स्पर्शावबोधं कृत्वा गलितनिवारणं साध्यमेव ।
7. सर्वेषां छात्राणां समावेशिता (inclusivity of all kinds of students)
   स्तरानुसारं बुद्धिरहिताः छात्राः अपि अमूर्तकक्ष्यायां सोत्साहं भागभाजः भवितुमर्हन्ति | तेषां बुद्ध्यानुसारं पाठभागान् क्रमशः पठितुमवसरः सिद्ध्यति।
8. व्ययस्य न्यूनीकरणम् ( Cost reduction)
   धनव्ययं अधिकतया एतादृशपठने न ।
9. सुलभता प्रौद्योगिकी च (Accessibility and Technology)
   अमूर्तकक्ष्यायै अवसरः यथेष्टं सिद्ध्यति। अपि च एतादृशं पठनं प्रौद्योगिक्याः आधारेणैव भवति। अत्र अध्यापकैः साकं निरन्तरमाशयविनिमयाय रसावहपठनाय च साहाय्यकमेव। साधारणतया परम्परागतकक्ष्यापठनं वैरस्यं धनसमयनष्टं च जनयति।

**लाप्टोप् (Laptop)**

लाप्टोप् नामकः पठनसाहाय्यकोपकरणं भाषापरीक्षणशालायां वर्तते, येन अधिकाः लाभाः छात्राः प्राप्नुवन्ति। भाररहिते अस्मिन्नुपकरणे प्रदर्शनाय(Display) संविधानमस्ति। अधिकान् विभवान् स्वीकर्तुं सन्नद्धेऽस्मिन् सङ्गणकयन्त्रवत् सर्वविधाः सौकर्याः सन्ति । हस्तेन धर्तुं योग्यमिदमुपकरणम्। WiFi, Bluetooth तथा कौशिकीयजालं (cellular networks) च सन्ति। लाप्टोपः उपयोगः इदानीं वाणिज्ये, विद्याभ्यासे, क्रीडायां, व्यक्तिगतत्वेन वर्तमानायां मल्टिमीडियायां जालपुटब्रौसिंङ् इत्यादिषु वर्तते।

**स्वयंवाहविद्या/ स्वचालनम्**

भाषागवेषणशालानां स्वयंवाहविद्याम् आचरितुं योग्यं संविधानं वर्तते। शक्तिपूर्वकमाशयमवतर्तुं स्वचालनेन शक्यते। तस्य लाभाः ।

1. कुशलता।(Efficiency)
2. उत्पादकता (Productivity)
3. व्ययन्यूनीकरणं (Cost savings)
4. दोषाः न्यूनीकृताः: (Reduced errors)
5. उपभोक्तृसंतृप्तिः (customer satisfaction)
6. कार्मिक संतृप्तिवर्धनम् (Increasing-employee satisfaction)
8. कागदाधारितप्रक्रियाणां निष्कासनम् (Eliminated paper based process)
9. आकर्षणीयता,आशयानां झटित्यवबोधनम् (Attractive and easly communicated)

**कृत्रिम बुद्धिमत्ता (Artificial intelligence)**

सङ्गणकयन्त्रस्यशक्त्या मानवबुद्धिमतिक्रमितुं योग्या मानवकर्माणि सहसा निवोढुं योग्यं यन्त्रमेव कृत्रिक-बुद्धिमत्ता । गवेषणस्य परामवस्थां प्राप्तेन अनेन यन्त्रेण पठनं लेखनं निर्माणादिकं च कर्तुं शक्यते । कुशलतां नैपुणीं उत्पादकत्वं च संवर्धितुं अधिकतया विपुलां भाषारीतिं रूपीकर्तुं (large language models) कृत्रिमबुद्धिमत्ता उपकरोति ।

## पुनरावृत्तिः (Recap)

- आधुनिकोपकरणानां साहाय्येन अनुदिनं प्रवर्धमाना संस्कृतभाषा साधारण जनानां भाषा एव ।
- संभाषण कार्यशालायां ललितरीत्या भाषणसाहायकयुक्तानि उपकरणानि सन्ति ।
- इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्।

- अस्माभिः आदर्शात्मकरूपेण यतितालयानुपूर्वम् अनुलेखं कृत्वा पुनः श्रवणाय नुदति चेत् पद्यानि संगीतानि वा यथेच्छं श्रावयितुं शक्यते ।
- सङ्गणकपरीक्षणयन्त्रशाला मात् आदर्श संस्कृतमहाविद्यालये वर्तते ।
- समाजस्य स्फुरणमेव माध्यमिकपत्रेषु दृश्यते ।
- अमूर्तकक्षायाः कश्चन लाभः भवति। युक्तिपूर्वं समयनियन्त्रणम्।
- प्रपञ्चेस्मिन् वर्तमानाः समानवयस्काः छात्राः किं कुर्वन्ति कथं कुर्वन्ति कियत्पर्यन्तं कालं तदर्थं विनियुज्यन्ते इत्यादिकानि कार्याणि द्रष्टुं शक्यते।
- भाररहिते लाप्टोप्नामके उपकरणे प्रदर्शनाय (display) संविधानमस्ति ।
- लाप्टोपः उपयोगः इदानीं वाणिज्ये, विद्याभ्यासे, क्रीडायां, व्यक्तिगतत्वेन वर्तमानायां मल्टिमीडियायां, जालपुट-ब्रौसिंङ् इत्यादिषु वर्तते ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. संस्कृतस्य स्वाधीनं कुत्र वर्तते ?
2. कुत्र ललितरीत्या संस्कृतभाषणसहाय्यकोपकरणानि सन्ति ?
3. दर्पणं कीदृशं भाषापठनोपकरणं भवति?
4. विज्ञानदायकमाकर्षकं आशयानां झटित्यर्थबोधकं पठन- साहाय्यकोपकरणं किम्?
5. स्पन्दनद्वारा (vibration) सूचिकायाः चलनेन शब्दान् जनयितुं योग्यस्य यन्त्रस्य नाम किम्?
6. संस्कृते अनुदिनं प्रसारितं संस्कृतवार्तापत्रं किम्?
7. 'सम्भाषणसन्देश ' इति माध्यमं कस्मिन् विभागे अन्तर्भवति?
8. मूल्यनिर्णये स्वालित्यदर्शने सहसा स्पर्शावबोधं(feedback) कृत्वा गलितनिवारणाय योग्या कक्ष्या का?
9. सङ्गणकयन्त्रस्य सर्वाणि कार्याणि अनेनापिकर्तुं शक्यते, अपि अतिभाररहितत्वात् सर्वत्र नेतुं शक्यते । अस्य साहाय्यकोपकरणस्य नाम किम् ?
10. मानवबुद्धिमतिक्रम्य प्रवर्तितुं योग्या तथा कुशलतां नैपुणीं उत्पादकत्वं च संवर्धितुं विपुलां भाषारीतिं रूपीकर्तुं साहाय्यकस्य उपकरणस्य नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत ।

(Answer the following questions in one or two sentences)

1. अमूर्तकक्ष्यायाः लाभाः के ?
2. 'लाष्टोप्' इत्यस्य उपयोगः कुत्र कुत्र वर्तन्ते ?

## एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

1. भाषापठने सङ्गणकयन्त्रस्य प्रचारणमधिकृत्य विचारयत।
2. स्वयंवाहविद्यायाः, (स्वचालनस्य) प्रचारणेन के लाभाः सिद्ध्यन्ति?

## निर्दिष्टाभ्यासः (Assignments)

1. संस्कृतसम्भाषणशालायां वर्तमानानां यथेच्छं चतुर्णां विवरणं लिखत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. लोकभाषासु प्रायेण सर्वत्र ।
2. संस्कृतसंभाषणकार्यशालायाम्।
3. दृश्यरूपम्।
4. स्वयंवाहविद्या(animation)
5. स्वनग्राहियन्त्रम् (tape recorder)
6. सुधर्मा ।
7. मासिक्याम्
8. अमूर्तकक्ष्या - Virtual classroom
9. लाष्टोप् ।
10. कृत्रिम बुद्धिमत्ता- artificial intelligence.

## सूचना (Reference)

1. Equipments in Sanskrit laboratory - news in internet
2. Benefits of automation-news in the internet.

BLOCK -4

# सङ्कणकयुगे संस्कृताध्ययनम्

SGOU

# Unit-1

# प्रत्याह्निकाः संस्कृतानुप्रयोगाः

## उद्देश्यानि (Learning outcomes)

- संस्कृतम् अनायासेन पठितुं शक्यते ।
- भाषाध्ययने उपयुक्तानां संस्कृतानुप्रयोगान् जानाति ।
- अन्तर्जाले वर्तमानानां आप्सः विशेषतां गृह्णाति ।
- संस्कृतभाषाप्रयोगे लाघवमनुभवति ।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतभाषा सजीवा साधारणजनैरपि उपयोक्तुं योग्या सरला काचन भाषा भवति। आधुनिकेऽस्मिन् युगे संस्कृतस्य प्रभावः सर्वत्र दृश्यते। संस्कृतं कठिना भाषा भवति इति वचनमधुना वक्तुं न शक्यते। पुरातनकाले गुरुमुखादेव ज्ञानार्जनमासीत्। गुरुः स्वपुत्रादपि स्नेहादयः शिष्येषु अर्पयति। गुरुः ज्ञानभाण्डागारमासीत्। सर्वविद्यापारङ्गतः शास्त्रवित् चासीत् गुरुः। परम्परागतप्रणाली प्रचारे आसीत्। संस्कृतं संस्कृतसम्बद्धाः विषयाः एव पाठ्यचर्या। यथेष्टं समयः अवर्तत। अधुना अनेके विषयाः पठितुं वर्तन्ते। समयस्तु विरलः। तदा परम्परागतप्रणालीमुपयोक्तुं न शक्यते। तदा नूतनाः प्रणाल्यः आविर्भूताः। शास्त्रसाङ्केतिकविद्यायाः साहाय्येन संस्कृतपठनं पाठनं च रसावहरूपेण प्रचालयितुं साध्यमेव । प्रतिदिनं नूतनाः वार्ताः नवीनाः संस्कृतानुप्रयोगाः च जायन्ते। तान् प्रयोगान् विशदीकरणञ्च अस्मिन् खण्डे विशदयति ।

## प्रधानांशाः/प्रधानपदानि (Key words)

प्रतिदिनं कर्मणि व्यापृताः जनाः – प्राभातिककर्मानन्तरं दिनपत्रपारायणे व्यापृताः - दिनस्य प्राधान्यं ज्ञात्वा मित्रेभ्यः आशंसाः – संस्कृतज्ञाः चेत् संस्कृते आशंसाः- संस्कृत दिनसम्बद्धाः- जन्मदिन -प्रेम-अभिनन्दन -अनुग्रह सम्बद्धाः - संस्कृतकोशसम्बद्धाः आप्सः सन्ति।

## विशदीकरणम् (Discussions)

भाषा आशयविनिमयाय उपयुज्यते । संस्कृतभाषापि तथैव । संस्कृतं कठिनभाषा इति विचारः आधुनिकेऽस्मिन् यन्त्रयुगे कदापि वक्तुं न शक्यते । प्रतिदिनं प्रभातादारभ्य निद्रापर्यन्तं संस्कृतस्य उपयोगः केषुचित् भारतीयग्रामेषु जनाः उपयुज्यन्ते । इतरभाषावत्

संस्कृतं साधारणजनाः प्रयुज्यन्ते । तदर्थं योग्याः संस्कृतानुप्रयोगाः सन्ति । अस्मिन् सङ्गणकयुगे संस्कृताध्ययनं सुकरं ललितं च भवति । संस्कृतस्यौन्नत्यस्य हानिं विना स्वतःसिद्धां पवित्रतां संरक्ष्य तस्याः भाषायाः प्रोन्नतिः संवर्धते ।

### 4.1.1.संस्कृते आशसामर्पयितुं योग्याः आपः(Apps)

सुप्तोस्थिताः जनाः संस्कृतभाषायां वर्तमानस्य आशंसारूपस्य आपः वार्तां दृष्ट्वा जागरिताः भवन्ति। प्रभातिककर्मानन्तरं कर्मणि, व्यापृत्ताः जनाः दिनपत्रपारायणे व्यापृताः भवन्ति । दिनस्य प्राधान्यं ज्ञात्वा मित्रेभ्यः आशंसामपर्पयन्ति। तदर्थं संस्कृतभाषां उपयुज्यन्ते। चतुर्सहस्राधिकाः आशंसाः सान्स्ग्रीट् (Sansgreet) नामके आप्पि वर्तन्ते । आमुखत्वेन अस्मिन् वर्तते यत् संस्कृते वर्तमानाः तव आशंसाः सुहृद्भ्यः वितरतु इति ।
कतिपयान् आशंसान् सूचयामः।
2024 वर्षे मेय्मासस्य दशमे दिने आगता आशंसा- 'अक्षयतृतीयायाः शुभकामनाः' इति । नवमे दिने तु महाराणा प्रतापसिंहस्य तथा गोपालकृष्णगोखलेवर्यस्य च जन्मवार्षिकम् । अपि च 'मातृभूमेः! जीवनं मे त्वत्पूजार्थम् इति प्रार्थनया च । तेषु -

**A) जन्मवार्षिकसम्बन्धाः काश्चन आशंसाः**

1.'यः परार्थमुपसर्पति स सत्पुरुषः'- एम्जि. रामचन्द्रवर्यस्य जन्मवार्षिकम् - जानुवरि १७.
2. 'साहसे वसति जयश्रीः' - भारतीयवायुसेनायाः पिता-एयर् मार्षल् सुब्रतो मुखर्जीवर्यस्य जन्मवार्षिकम् - मार्च ५।
3. 'प्रज्ञां ददाति य आचार्यः तस्मात्सगुरुरुच्यते' - कुमारनाशान् जयन्ती - एप्रिल् १२.
4.'जरिष्यति हि वै नूनं पठन्वा ह्यपठन्नपि संपक्ष्यति पठन्नेव अपठन्ननवसादयेत्' कुञ्जुण्णिमाष्वर्यस्य जन्मवार्षिकम् - मेय् १०
5. 'वाग्मिता श्रेयसी मता' -गुरुः अमर् दास् जयन्ती -मेय् ५।
6: 'कर्मायत्तं फलं पुंसाम्- के. आर्. नारायणन्वर्यस्य जन्मवार्षिकम्' - ओक्टोबर २७.
7. 'राष्ट्रगुरुः' - सुरेन्द्रनाथ् बानर्जीवर्यस्य जन्मवार्षिकम् नवम्बर् - १०
8. 'वन्दे मातरम्'-मीराबेन्-शान्तिघोष् एतयोः जन्मवार्षिकम् नंवम्बर्-२२
9. 'राष्ट्रियक्षीरदिनस्य शुभकामनाः'- डा. वर्गीस् कुरियन् वर्यस्य जन्मवार्षिकम् - नवम्बर् २६
10.'कर्तव्यं हि सतां वचः'- अरुण् जेट्लीवर्यस्य जन्मवार्षिकम् डिसम्बर् २८
11. दयामूलो मतो धर्मः - श्रीशारदा देवि जयन्ती दिसम्बर् २२

**B) दिनस्य प्राधान्यविषयेऽपि काश्चन आशंसाः**

1.मेय् १ - कर्मास्वादः कर्मसंसिद्धिमानयेत्'- विश्वश्रमिकदिनस्य शुभकामनाः।
(International Labour Day)

2. आगस्त् ९– रक्षेत् धरारक्षकान्'- विश्वतद्देशीयजनदिवसस्य शुभकामनाः ।

3. नवम्बर् १४- सर्वे सन्तु निरामयाः - विश्वप्रमेहदिनम् ।

4.डिसम्बर् ९- एकत्रिताः भ्रष्टाचारं निरोद्धुं (United against Corruption)- अन्ताराष्ट्रभ्रष्टाचारविरुद्धदिनम्।

5. डिसम्बर् १६ – वीरभोग्या वसुन्धरा - विजयदिवसः।

**C) स्मृतिदिनाधारेऽपि बह्वयः आशंसाः सन्ति । तासु कतिपयाः -**

1. अनुशासनं सङ्घटितकार्यञ्च - देशस्य शक्तिदे द्वे स्रोतसी- भारतरत्नलाल् बहदूर् शास्त्रिवर्यस्य स्मृतिदिनम् जानुवरी ११
2. जालियांवालाबाग् हत्याकाण्डस्य स्मृतिदिनम् - एप्रिल् १३
3. 'कर्तव्यं हि सतां वचः'- प्रोफ. आर्- वासुदेवन्पोट्टिवर्यस्य स्मृतिदिनम् - मेय् २
4. 'वन्दे केरलपाणिनिम्'- ए.आर्. राजराजवर्मा वर्यस्य स्मृतिदिनम्। जून् १२
5. 'महात्मा गान्धिजयन्त्याः शुभकामनाः'- ओक्टोबर् २।
6. 'नादाधीनं जगत्सर्वम्' - मुत्तुस्वामिदीक्षितवर्यस्य स्मृतिदिनम् -ओक्टोबर् २१.
7. 'विक्रमार्जितस्य स्वयमेव मृगेन्द्रता'-सर्दार् वल्लभाई पट्टेल् वर्यस्य स्मृतिदिनम् - डिसम्बर् २५

**D. स्नेहसम्बद्धानां तथा अभिनन्दनानि चार्पयन्तीः अनेकाः आशंसाः सन्ति । तासु काश्चिदत्र सूचयामः ।**

1. 'भावैकरसं मनः ।
2. स्नेहः सत्यमस्ति ।
3. श्रीसिद्धिदात्र्यै नमः - नवरात्रस्य शुभकामनाः ।
4. राष्ट्रधर्मनिष्ठावान् अखण्डं भारतं स्मरेत्। गणतन्त्रदिनस्य शुभकामनाः (Republic Day wishes)
5. हरिस्मृतिः सर्वविपद्विनाशिनी-अष्टमिरोहिणी-शुभकामनाः ।
6. नित्यनूतनं संस्कृतम्- संस्कृतसप्ताहस्य शुभकामनाः।
7: पद्मश्री हेममालिनीवर्यायै नः - जन्मदिनशुभकामनाः ।
8. मेजर् ध्यान् चन्द्- खेल् रत्नपुरस्कारविजेत्तृभ्यः नः अभिनन्दनानि ।

**संस्ग्रीट्नामकस्य विवरणाय**

https://play.google.com/store/apps/details?id=Com.sans.greet.live sanskrit & pcampaignid = web-Share.

4.1.2.**संस्कृतसंभाषणशब्दकोशसम्बन्धि आप्प्** (App is spoken Sanskrit dictionary)

सङ्कोषः नाम आप्प् वर्तते यत् प्रायेण सर्वैरपि सुगमया रीत्या पठनं पाठनं च कर्तुं योग्यं भवति। अस्मिन् रूपाणां यथार्थं रूपं विशेषताः च सूचयन्ति। यथा सभा इति पदस्य Nominative singular of noun सभा इति प्रदर्शयति । अपि तस्मिन् मोणियर् (Monier) महाभागेन आङ्गलभाषायां सूचितमर्थमपि सूचयति ।तद्यथा (of unknown derivation, but probably to be connected with 7) पुनरपि Aसूचयति - "an assembly, congregation, meeting, council, public audience" माक्डोणः अर्थमपि तस्मिन् वर्तते । सभा इति पदस्य "assembly hall, gambling house, assembly, Company इत्यादयः।

अस्य पदस्य आप्ते (pte) महाशयेन सूचितमपि वर्तते ।सह भान्ति अभीष्ट निश्चलार्थमेकत्र यत्र गृहे' इति ।

संभाषणे संस्कृते (Spoken Sanskrit) सभा इत्यस्य ऊनविंशतिः अर्थाः वर्तते। यथा meeting, society, conclave, palace, court of a king or of justice, large assembly or hall, or room, committee, large assembly-room or Hall, Assembly council-chamber, social party, Court, house for lodging and accommodation of travelers, an eating house, assemblage, public audience, congregation, council, good society, place of public meetings and gambling house.

विल्सन्महाभागः सभा इत्यस्य A House, An assembly, a meeting इत्यर्थान् संसूच्य, सभापदस्य निरुक्तमपि सूचयति। स for सह together, भा to shine, affs. अङ् , and टाप्' इति।

सङ्कोषस्य सविशेषता भवति यत् प्रथमं साधुपदचयनाय निर्देशः ।साधुपदं चित्वा तस्य अर्थाः मोणियर् - माक्डोणल्- आप्ते इत्यादीनां मते वर्तमानान् अर्थान् संसूच्य संस्कृत-भाषणे (Spoken Sanskrit) वर्तमानान् प्रायेण दशाधिकान् अर्थान् सूचयति । पुनः विल्सन् (Wilson) महाभागस्य मते अर्थान् , सूचितकथा चेत् सापि विशदीकरोति ।अन्ते तस्य पदस्य निरुक्तिं, निष्पत्तिं च संसूचयति ।अतः न केवलं बालेभ्यः किन्तु अध्यापकेभ्यः गवेषकेभ्यः च इदमाप्प् उपकारप्रदं भवति ।

अपरमाप्प् भवति श्रुजन् झा (Srujan Jha) महाशयेन रूपीकृतं तथा प्रोफ-मदन्मोहन् झा(Prof.MadanMohanJi) महाशयेन संविधानं कृतं संस्कृत-आङ्गलेयीशब्दकोशः (Sanskrit. English Dictionary) तस्मिन् आप्पि चयितं पदम् (word selected) आङ्गलेयपदं (word in English), अर्थः सन्ति । यथा अंशः इत्यस्य आङ्गलेय्यां AMza इति, आङ्लेय्यां अर्थः Part इति । अम्बा इति संस्कृतं पदम् । । Mother इति आङ्गलेय्यमर्थः च। संस्कृतं (Sanskrit) नामकः आप्प् इदम्।

अन्तर्जाले वर्तमानं अपरं शब्दकोशं भवति संस्कृतशब्दकोशः 1.2 (Sanskrit Dictionary 1.2)| अभिसोफ्ट् तन्त्रेण रचितमिदम् (By Abhisoft Tech). अस्य विलासः भवति www.abhisoft.net. छात्रेभ्यः पठनार्थं रचितेऽस्मिन् आप्पि संस्कृतपदानि तेषामर्थाः सूचिताः।

अपरमन्तर्जालगतं शब्दकोशं भवति विद्यार्थिसंस्कृतशब्दकोशः (Vidyarthi Sanskrit Dictionary)। अस्मिन् संस्कृत-हिन्दी-आङ्गलेयीशब्दसूचिः वर्तते। यथा अऋणिन् इति पदस्य अऋणि इति संस्कृते, जिस पर कर्ज न हो इति हिन्द्यां indebted, who does not have debt इति आङ्गल- भाषायां चार्थाः सूचिताः। एवं ऋज् इति संस्कृतपदस्य हिन्दीभाषायां 'जाना, कमाना, स्थिर रहना इत्यर्थः, आङ्गलभाषायां – ‘go,earn, stay' इत्यर्थाः सन्ति।अपि उपरि भागे विरामचिह्नं, समासः, सन्धिः, छन्दः इत्यादीनि लिखितानि च ।

अपरमाप्प् भवति संस्कृतशब्दकोशः ( Sanskrit- Dictionary)। अस्य विलासः भवति 'learnsanskrit.cc इति । संस्कृत-हिन्दी शब्दकोशः (Sanskrit Hindi Dictionary) इति शब्दकोशं वर्तते, यत् श्रुजन् महाभागेन विपुलीकृतम्। अस्मिन् संस्कृतपदानां हिन्दीभाषायां अर्थं विशदयति।

भाषान्तरीकरणाय अपि संस्कृते आप्प् (app) वर्तते । क्विल्बोट्स (Quill Bot's) नामकः आचार्यः आङ्गलभाषातः संस्कृते भाषान्तरीकरणाय किमपि आप्प् निर्मितवान्। संस्कृत -आङ्गलेयीशब्दकोशः $360^0$, अपरः जालान्तर्गतमाप्प् भवति। अस्मिन् द्विलक्षाधिकानि संस्कृतपदानि सन्ति। तेषां सर्वेषां पदानां अर्थ-लिङ्गादिपूर्वकं सविस्तरं प्रतिपादितमस्ति।

एस्. के. पण्डवत्त् नामकेन रचितं 'मलयाल-संस्कृत निघण्डु' शब्दकोशमण्डले विराजमानः कश्चन ग्रन्थः भवति । भाषायाः भाण्डागारे वर्तमानानां पदानां क्रमानुगतः शेखरः भाषापठनस्य अवश्यघटकः भवति।

## पुनरावृत्तिः (Recap)

- संस्कृतपाठनाय पूर्वं परम्परागतप्रणाली प्रचारे आसीत्।
- संस्कृतज्ञाः चेत् संस्कृते आशंसाः मित्रेभ्यः प्रेषयेयुः।
- अस्मिन् सङ्गणकयुगे संस्कृताध्ययनं सुकरं ललितं च भवति ।
- राष्ट्रगुरुः' इति नाम्ना प्रख्यातः भवति सुरेन्द्रनाथ् बानर्जी महाशयः।
- दयामूलो मतो धर्मः - श्रीशारदादेवी जयन्ती ।
- विश्वश्रमिकदिनम् मेय्मासस्य प्रथमे दिने भवति ।
- नित्यनूतनं संस्कृतम् इति आशंसा संस्कृतसप्ताहस्य भवति।
- मोणियर्- आप्ते-माक्डोणल् इत्यादीनामपि अर्थकथनं सङ्क्षेपः नामके आप्पि वर्तते।
- सङ्क्षेपस्य सविशेषता भवति यत् प्रथमं साधुपदचयनाय निर्देशः ददाति।
- संस्कृत-हिन्दी शब्दकोशः श्रुजन्महाभागेन विपुलीकृतम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. पुरातनकाले ज्ञानार्जनं कस्मादासीत् ?
2. अधुना संस्कृतपठनं पाठनं च रसावहरूपेण कुतः प्रचालयितुं शक्यते ?
3. आशंसाः अर्पयितुं योग्यस्य आप्पः नाम किम् ?
4. मीराबेन्-शान्तिघोष् एतयोः जन्मवार्षिकदिनं किम्?
5. अन्ताराष्ट्रभ्रष्टाचारविरुद्धदिनं कदा?
6. गणतन्त्रदिनस्य शुभकामना का?
7. सङ्क्षेपे दत्तस्य सूचितककथा वर्तते चेत् कः महाशयः तां विशदयति ?
8. संस्कृत-आङ्गलेयीशब्दकोशः नामकस्य आप्पः संविधायकः कः?
9. आङ्गलभाषातः संस्कृत भाषान्तरीकरणं कुर्वतः आप्पः निर्माता कः ?
10. संस्कृत-आङ्गलेयी- शब्दकोशः $360^0$ इत्यस्मिन् आप्पि कति संस्कृतपदानामर्थविवरणमस्ति?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।

(Answer the following questions in one or two sentences)

1. श्रुजन्महाभागेन किम् विपुलीकृतम् ?
2. सुरेन्द्रनाथ् बानर्जी महाशयः केन नाम्ना प्रख्यातः?
3. गणतन्त्रदिनस्य शुभकामना का ?

## एकैकया खण्डिकया उत्तराणि लिखत।

(Answer the following questions in a paragraph)

1. दिनस्य प्राधान्यसूचकाः कतिपयाः आशंसाः लिखत।
2. सङ्कोषः किम् ?

## निर्दिष्टाभ्यासः (Assignment)

1. एकं संस्कृतसम्भाषणसहायकं शब्दकोशमधिकृत्य विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. गुरुमुखात्।
2. शास्त्रसाङ्केतिकविद्यायाः प्रभावेन ।
3. सान्स्ग्रीट्।
4. नवम्बर् २२
5. डिसम्बर् ९।
6. राष्ट्रधर्मनिष्टवान् अखण्डं भारतं स्मरेत् ।
7. विल्सन्।
8. प्रो. मदन् मोहन्-झा।
9. क्विलबोट्स्- Quill Bot's
10. द्विलक्षाधिकानि ।

## सूचनाः (Reference)


1. App Sankosha in internet
2. SANSgreeet livesanskrit in internet
3. Sanskrit dictionary in Google

# Unit-2

# सङ्गणकाधारिताः साम्प्रदायिककोशाः

## उद्देश्यानि(Learning outcomes)

- संस्कृतम् अनायासेन पठितुं शक्यते ।
- संस्कृताध्ययने उपयुक्तस्य सङ्कणकयन्त्रस्य प्राधान्यम् अवगच्छति ।
- अमरकोश-आप्पः प्राधान्यं जानाति ।
- ‘शब्दकल्पद्रुमः आप्पः’ सविषेषतां गृह्णाति ।

## प्राग्व्यपेक्षाः (Pre requisites)

आधुनिकानां साङ्केतिकोपकरणानां साहाय्येन संस्कृतपठनं सरलतया रीत्या प्रचलति । संस्कृतं कठिनभाषा इति प्रतीतिः इदानीं न वर्तते । यान्त्रिकेऽस्मिन् युगे सङ्गणकयन्त्रस्य तदनुबन्धानां प्रयोगात् भाषाप्रयोगे प्रायः सर्वे प्रवीणाः संजाताः । संस्कृतभाषा अतिविपुला काचन भाषा भवति । अनेकानि पदानि संस्कृते सन्ति । एकस्य पदस्य स्थाने बहूनि पदानि प्रयोक्तुं योग्या पदावली अस्याः भाषायाः सविशेषता भवति । अन्तर्देशीयभाषायाः आङ्गलभाषायां सूर्यः इत्यर्थे एकमेव पदम् । Sun इति । संस्कृते तु सूर्यपदस्य पर्यायरूपेण चतुर्पञ्चाशत् (54) पदानि सन्ति । सूरसूर्यार्यमादित्यः इत्यारभ्य पद्मिनीपतिः इति यावत् ।

पदबाहुल्ये संस्कृतवत् उन्नता काचन भाषा इतःपर्यन्तं न जाता। अपि च श्लोकरूपेण वर्तमानाः पङ्क्तयः इत्यतः स्मृतौ तानि पदानि स्थिरतया स्थास्यन्ति। पदानि तावत् मित्राणि इति विश्वासः । अधुना अमरकोशपदानि आप्प्-मध्ये धटिताः । सङ्गणकाधारिताः आप्प्- शब्दकोशाः बहवः सन्ति । अस्मिन्नेकके अमरकोश -आप्प् तथा शब्दकल्पद्रुम-आप्प् चाधिकृत्य पठामः ।

## प्रधानांशाः/ प्रधानपदानि (Key words)

अमरकोशः अमरपदस्यार्थः- अमरपदेन विवक्षितः अर्थः- अमरसिंहः - काव्यशास्त्रपठनात्पूर्व-नामान्तरं - पदानां लिङ्गं - काण्डत्रयं - स्वर्गादिसम्बधाः- भूवर्गादयः द्वितीयकाण्डे – अवशिष्टाः तृतीयकाण्डे -षड्विंशतिः वर्गाः – त्रिसहस्रं श्लोकाः -दशसहस्रं पदानि - काश्चन टीकाः -महेश्वरस्य व्याख्या - मेदिनीकोशः - जगन्नाथशास्त्रिणः व्याख्या - अमरकोशः आप्- निर्माणं सुमन् झा -संविधायकः- प्रोफ-मदनमोहन झा पदस्यार्थः - समानार्थकपदानि -वाचस्पत्यम्- शब्दसागरः- आप्ते – मोणियर् – विल्ल्यम्स्- पुराणसूचकः-

पुराणविश्वविज्ञानकोशार्थः। महाभारत – सांस्कारिकसूचना - शब्दकल्पद्रुमः नामकः – आप्प् – शब्द-लिङ्गप्रकारश्च- अर्थः सन्दर्भश्च-पर्यायाः।

## विशदीकरणम् (Discussions)

संस्कृतभाषा काचन सांस्कृतिकभाषा भवत्यपि प्रादेशिकभाषावत् साधारणजनाः अनायासं प्रयुज्यन्ते। कठिनभाषा इति प्रतीतिः अस्मिन् सङ्गणकयुगे न वर्तते । सङ्गणकाधारिताः साम्प्रदायिककोशाः तदर्थं बहूपकारकाः भवन्ति । संस्कृतस्य वैशिष्ट्यस्य कारणेषु अन्यतमं भवति संस्कृतस्य विपुला पदसम्पत् । प्रायः इतराः सर्वाः भाषाः अपेक्ष्य अस्याः पदस्वाधीनता प्रशंसनीया भवति। एकस्य पदस्य स्थाने अनेकानि पदानि प्रयोक्तुं शक्यते। आङ्गलभाषायां सूर्यः इत्यस्यार्थे प्रयुज्यमानं पदं भवति सन् (Sun) इति ।अस्य समानार्थकम् अन्यत्पदं विरलमेव । संस्कृतस्य स्थितिः व्यत्यस्था। सूर्यस्य पर्यायरूपेण चतुर्पञ्चाशत् (54) पदानि अमरकोशे वर्तन्ते।

## अमरसिंहस्य अमरकोशः

भारतीयपण्डितेषु अग्रगण्येन अमरसिंहेन रचितः प्रख्यातः कोशग्रन्थः भवति अमरकोशः । अस्य ग्रन्थस्य नामान्तरं भवति नामलिङ्गानुशासनम् । नाम्ना सूचितमिव अस्मिन् नामपदानामर्थः लिङ्गनिर्णयः च कविना कृतम्। अमरः इत्यस्य मरणरहितः इत्यर्थः। पदच्छेदेन अन्तलिङ्गसूचनया अर्थं संसूच्य शुद्धरूपं प्रदास्यति इत्यतः सुजनप्रियं भवति अयं ग्रन्थः। पूर्वं केरलीयाः सिद्धरूपं अमरकोशं च पठित्वा काव्य-शास्त्रादीनि पठितुं यतन्ते। अयं अमरसिंहः कविः वैयाकरणः च भवति । विक्रमादित्यमहाराजस्य वर्तमानेषु नवरत्नेषु अन्यतमः इति विश्वासः वर्तते । अस्य कालः किस्तुवर्षे सप्तमे शतके इति केचन। अस्मिन् त्रीणि काण्डानि, षड्विंशतिः वर्गाः त्रिसहस्राधिकाः श्लोकाः दशसहस्राधिकानि पदानि च सन्ति।

अमरकोशस्य अनेके टीकाकाराः सन्ति। तेषु अन्यतमः भवति रामाश्रमी संस्कृतप्रकाशाख्यः। अस्याः टीकायाः व्याख्या पण्डितेन हरगोविन्दशास्त्रिणा रचिता । महेश्वरनामकस्य पण्डितस्य मेदिनीकोशव्याख्या, जगन्नाथशास्त्रिणः च व्याख्या च प्रसिद्धे भवतः। अमरकोशस्य प्रथमे काण्डे स्वर्गादिसम्बद्धाः नववर्गाः, द्वितीये खण्डे भूवर्गीयाः दश वर्गाः, तृतीयकाण्डे अवशिष्टाः षट् वर्गाः च सन्ति।

अमरकोशे आप्पि साधारणरीत्या पदस्य लिङ्गः, समानार्थकपदानि अमरकोशकारिका, वाचस्पत्यं शब्दसागरः- मोणियर् - विल्ल्यस् - पुराणसूचकः विश्वविज्ञानकोशार्थः महाभारत-सांस्कारिकसूचनाः च सन्ति । यथा खगः इति पदं परिशोधयामः। पदं खगः । लिङ्गः पुंलिङ्गः। अर्थः पक्षी। समानार्थकपदानि - खगः, विहङ्गः, विहगः, विहङ्गमः, विहायाः, शकुन्तिः, पक्षी, शकुनिः, शकुन्तः, शकुनः, द्विजः, पतत्री, पत्री, पतंगः, परुत्, पत्ररथः,

अण्डजः, नगौकाः, वाजी, विकिरः, विः, विष्किरः, पतत्रिः, नीडोद्भवः, गरुत्मान्, पित्सन्, नभसङ्गमः, इति पदानि ।

**अमरकोशपंक्तिर्यथा -**

**खगे विहङ्गविहगविहङ्गमविहायसः ।**

**शकुन्तिपक्षिशकुनि शकुन्तशकुनिद्विजाः ।** इत्यादयः

पुनः पक्षिणां नामानि । तानि तु गरुडः, कपोतः, श्येनः, उल्लूकः, भरद्वाजपक्षी, खञ्जनः, कङ्कः, चाषः, भृङ्गः, काष्ठकुट्टः, चातकपक्षी, कुक्कुटः, चटकः, कोकिलः, काकः, शुकः, क्रौञ्चः, बकः, सारसः कालकण्ठकः, चिल्लः, गृध्रः, चक्रवाकः, कलहंसः, कुररः, हंसः, आडिः, जतुका,तैलपात्रिका, मयूरः, भासः ।

पुनः वाचस्पत्यम्। खगः - खे आकाशे गच्छति। गमेर्डः। सूर्ये, देवे, शरे , वायौ, शलभभेदे भरतः । इत्येवं रूपेण शब्दसागरे खगपदस्थाने एवं अर्थाः सन्ति। A bird, an arrow, The sun, a planet deity, air, wind, A grasshopper.

मोणियर् – विल्ल्यस् एवं सूचयति। खगः moving in air, a bird, any air moving insect, a grasshopper, the sun Heat, a planet, air, wind, deity.an arrow etc.

पुराणसूचके विश्वविज्ञानकोशार्थे एवं खगपदस्य विशदीकरणं वर्तते । A mythical suspect living Bhagavati puri. Son of surasa and Kasyapa

महाभारतसांस्कारिकसूचके एवं दृश्यते 'A mythical Serpent living in Bhagavate puri. Son of suras and Kasyapa इति।

अपरम् अमरकोश-आप् 'AppBrain' भवति। तस्य विलासः तु https://www.appbrain.com>app इति ।

अन्यत् तु - Amarakosha – Dictionary of India APK for Android. तस्य नाम APKPure. विलासस्तु - https://apkpure.com>bharata.a.

अन्यत् भवति यत्- Amarakosh Sanskrit APK for Android इति। To I Softonic इति नाम https://amarakosha-Sariskrit, en. So... इति।

## शब्दकल्पद्रुम -आप्प्

शब्दकल्पद्रुमः नामकस्य आप्पः निर्माणं श्रुति झा महाशयेन कृतम् ।तस्य निर्देशनं तु प्रो. मदनमोहन झा महाशयेन कृतमासीत् । अयं महाशयः अनेन रूपेण प्रास्ताविकं कृतम् यत् 'शब्दकल्पद्रुमः आधुनिकः संस्कृतसम्बद्धः किञ्चन महाशब्दकोश-आप्प् भवति। अयं राज्ञः राधाकान्तबहादुरमहाशयस्य निर्देशानुसारं निर्मितः भवति । अयं पूर्णतः संस्कृतस्य एकभाषीयः कोशःभवति।तस्य सप्त खण्डानि सन्ति । अस्मिन् शब्दकोशे उपलब्धस्य संस्कृतसाहित्यस्य पदानि पूर्णतया उपयुक्तानि। ऐतिहासिकदृष्ट्या भारतीयकोशरचनायाः

विकासक्रम: सूचितः। न केवलं अनन्तरनिर्मितेषु शब्दकोशेषु किन्तु सर्वेषु विश्वकोशेषु अस्य प्रभावः व्यापकत्वेन वरीवर्ति इति।

अयं कोश: विशुद्धः शब्दकोशः न भवति । किन्तु अस्मिन् शब्दार्थकोशः पर्यायकोशः ज्ञानकोश: विश्वकोशस्य सम्मिश्ररूपेण वर्तमानः महाकोशः च भवति । अस्मिन् अनेकानि उद्धरणानि, उदाहरणानि, प्रमाणानि, व्याख्यानानि च सन्ति। पाणिनीयव्याकरणानुसारमेव अस्य रचना कृता ।

अस्मिन् आप्पि शब्दः, लिङ्गम्, अर्थः, सन्दर्भश्च विशदयति। यथा श्रुतिः इति शब्दः। लिङ्गं स्त्रीलिङ्गः । अर्थः सन्दर्भश्च एवं भवति । श्रूयते इति श्रुतिः । श्रु+ श्रुयजिस्तुभ्यः करणे इत्यस्य वार्तिकोक्त्या करणे क्तिन्। वेदः। 'यथा मनुः' श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः। कर्णः इत्यमरः । यथा भागवते "करौ हरेर्मन्दिरमार्ज्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ।" गर्भस्थस्य पञ्चमासैः श्रुतिर्भवति । इति सुखबोधः ॥ श्रुतेन्द्रियग्राह्यः शब्दः, शब्दत्वादिः । यथा घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः । तथा रसो रसज्ञायास्तस्य शब्दोऽपि च श्रुतेः इति भाषापरिच्छेदः । अमरकोश- आप्पि खगः इति पदस्य सविशेषताः अस्माभिः दृष्टाः। शब्दकल्पद्रुमे 'खगः' इति पदं कथं विशदयति इति पश्यामः।

खगः, पुं (खे आकाशे गच्छति । ख + गम्+ डः। सूर्यः । ग्रहः। (यथा ज्योतिषे । आपो क्लिमे यदि खगाः स किलेन्दुवारः। देवः। वाणः । पक्षी । इति मेदिनी । "तं व्रजन्तं खगश्रेष्ठं वज्रेणेन्द्रोऽभ्यताडयत्। वायुः । इति शब्दचन्द्रिका। तमासीव यथा सूर्यो वृक्षानग्रिर्घनान् खगः ॥" शलभः । इत्यमरटीकायां भरतः । यथा मनुः । 'मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः' ॥ महादेवः । यथा महाभारते आकाशनिर्विरूपश्च निपाती ह्यवशः खगः ।।"

अमरकोश - शब्दकल्पद्रुम- आप्पोः उपयोगेन पदस्वाधीनता वर्धते, भाषा रचनाग्रवर्तिनी च जायते ।

## पुनरावृत्तिः (Recap)

- संस्कृतभाषा अतिविपुला काचन भाषा भवति।
- संस्कृतभाषायां सङ्गणकाधारिताः आप्प्- शब्दकोशाः बहवः सन्ति।
- अमरसिंहेन रचितः ग्रन्थः भवति अमरकोशः ।
- अस्य ग्रन्थस्य नामान्तरं भवति नामलिङ्गानुशासनम्।
- पुरातनकाले केरलीयाः सिद्धरूपं अमरकोशं च पठित्वा काव्यशास्त्रादीनि पठितुं यतन्ते।
- एकस्य पदस्य अनेकानि पर्यायपदानि अमरकोशे सन्ति ।
- अमरकोशस्य आप्पि वाचस्पत्त्यव्याख्या वर्तते ।

- शब्दकल्पद्रुमः आधुनिकः संस्कृतसंबद्धः किञ्चन महाशब्दकोश – आप् भवति।
- खगः इति पदस्य ज्योतिषे ग्रहः इत्यर्थः वर्तते ।
- महाभारते खगः इत्यस्य महादेवः इत्यर्थः ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. आङ्गलभाषायां सूर्यः इत्यर्थे वर्तमानं पदं किम्?
2. अमरकोशे सूर्यः इत्यर्थे कति पदानि सन्ति ?
3. अमरः इत्यस्य कोऽर्थः?
4. अमरकोशे कति काण्डानि सन्ति ?
5. अमरकोशे कति वर्गाः सन्ति?
6. अमरकोशस्य कर्ता कः?
7. खगः इत्यस्य निरुक्तिः का ?
8. शब्दचन्द्रिकायां खगः इत्यस्य कोऽर्थः: ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।

(Answer the following questions in one or two sentences)

1. अमरकोशस्य सविशेषता का ?
2. अमरकोशस्य नामान्तरं किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत

## (Answer the following questions in a paragraph)

1. शब्दकल्पद्रुमः आप्प्।
2. अमरकोशः।

## निर्दिष्टाभ्यासः(Assignment)

1. अमरकोश-आप्प् -द्वारा कस्यचन पदस्य विशदीकरणं लिखत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. सन् (Sun)
2. चतुर्पञ्चाशत् (54)
3. मरणरहितः ।
4. त्रीणि।
5. षट्विशतिः ।
6. अमरसिंहः ।
7. खे आकाशे गच्छतीति खगः ।
8. वायुः।

## सूचनाग्रन्थाः (Reference)


1. अमरसिंहः, अमरकोशः व्यारव्या टि.वि.माधववार्यः, काणिपय्यूर्पञ्चाङ्गं, पुस्तकशाला, कुन्नंकुलम्।
2. Amarakosh / Sanskrit APK for Android internet.
3. Shabdakalpadruma / Sanskrit App in the internet.

# Unit-3

## भाषाध्ययने उपयुक्ताः संस्कृतानुप्रयोगाः

### उद्देश्यानि (Learning outcomes)

- संस्कृतमनायासेन पठितुं शक्यते ।
- संस्कृतपठनस्य साहाय्यकानामाप्पां ज्ञानं लभते।
- धातूनामर्थाः सविशेषताः च गृह्णाति ।
- क्रियापदानां पठनेन संस्कृते व्युत्पत्तिम् आर्जयति ।

### प्राग्व्यपेक्षाः (Pre requisites)

भाषा आशयविनिमयाय उपयुज्यते । भाषायां वाक्यानि पदानि च सन्ति । क्रियापदेनैव वाक्यस्य पूर्णता जायते। धातोः सकाशादेव क्रियापदानि निष्पाद्यन्ते । धातवः अनेके सन्ति । भूवादयो धातवः इति सूत्रेण धातुसंज्ञा विधीयते । क्रियावाचकाः भूप्रभृतयः धातुसंज्ञां लभन्ते इत्यर्थः। तिङन्तरूपस्य पदस्य प्रकृतिः धातुः । दधाति शब्दान् इति धातुः । पाणिनिना धातुपाठे प्रायः द्विसहस्रं धातवः उपदिष्टाः। ऐथून् लाब्स् इति धातुसम्बन्धि आप्पि अशीत्यधिकशताधिक द्विसहस्रं (2180) धातवः सूचिताः । पाणिनिना निर्दिष्टाः धातवः 'औपदेशिकाः' इत्युच्यन्ते । पाठभेदकारणतः धातुसंख्यायाम् अनियता दृश्यते ।

अस्मिन्नेकके औपदेशिकान् धातून् तेभ्योऽतिरिक्तान् आतिदेशिकान् धातून्, तेषां सविशेषताः, संस्कृतधातु $360^0$ नामकं आप्प् तथा षट्रूपमाला नामकं आप्प् चाधिकृत्य पठामः ।

### प्रधानपदानि /प्रधानांशाः(Key words)

भूवादयो धातवः - क्रियावाचिनः भ्वादयः धातुसंज्ञाः - पाणिनिना २००० धातवः सूचिताः औपदेशिकाः अतिदेशिकाः धातवः - सनाद्यन्ताः धातवः - त्रिधा-आत्मनेपदिनः परस्मैपदिनः - उभयपदिनः - अन्नुदेत्तेत: आत्मनेपदिनः - उदात्तेतः परस्मैपदिनः - स्वरितेत: उभयपदिनः सकर्मकाकर्मकत्वव्यवस्था - दशगणाः - प्रतिगणं विकरणप्रत्ययः- दश लकाराः – तिङ्प्रत्ययाः ऐयून् लाब्स् आप्प्- संस्कृतधातु (Sanskrit Dhatu $360^0$ धातुरूपमञ्जरी – क्रियाप्रयोगः। संस्कृतम् आप्प्- अक्षराणि – पदस्वाधीनता – व्याकरणम् – भाषणम्- वाचनम्- लेखनम्।

## विशदीकरणम् (Discussions)

भाषा आशयविनिमयाय उपयुज्यते। अङ्गैः सूचनैः च आशयविनिमयं साध्यमपि भाषया पूर्णतां प्राप्नोति। आशयस्य पूर्णता क्रियया सिद्ध्यति। धातोः सकाशादेव क्रियापदानां रुपनिष्पत्तिः। किं नाम धातुः? दधाति शब्दान् इति धातुः । तिङन्तरूपस्य पदस्य प्रकृतिः धातुः । भूवादयो धातवः इति सूत्रेण धातुसंज्ञा विधीयते । क्रियावाचिनो भ्वादयः धातुसंज्ञाः स्युः इत्यर्थः। पाणिनिना धातुपाठे प्रायः द्विसहस्रं धातवः सूचिताः । ऐयून् लाब्स् नामके आप्पि अशीत्यधिकैकशतोत्तरद्विसहस्रं (२१८०) धातवः निर्दिष्टाः । जनार्दन हेगडे स्वग्रन्थे धातुरूपनन्दिनी नामके ग्रन्थे १९४४ धातूनां विशदीकरणं दत्तवान्। सिद्धान्तकौमुद्यामपि १९४४ धातवः दर्शिताः। पाणिनिना धातुपाठे सूचिताः धातवः औपदेशिकाः । सनाद्यन्ताः धातवः इति सूत्रेणापि पाणिनिना धातुसंज्ञा विहिता। ते आतिदेशिकाः' इत्युच्यन्ते ।

धातवः अनेकार्थाः। धातुनिर्देशावसरे सप्तम्यन्तपदेन धात्वर्थः निर्दिश्यते। यथा भू सत्तायाम्, एध वृद्धौ, अद भक्षणे इत्येवम्।अत्र यः अर्थनिर्देशः कृतः सः प्रसिद्धिप्राचुर्यमवलम्ब्य कृतः भवति । धात्वर्थनिर्देशः सर्वत्र न हि पाणिनिना कृतः। प्रतिधातु अर्थनिर्देशः भीमसेनः नामक: आचार्य: कृतवान्।

### 4.3.1.परस्मैपदादिव्यवस्था

धातवः परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः इति त्रिविधाः। 'अनुदात्तङित आत्मनेपदम् स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रद्वयेन आत्मनेपदित्वं विधीयते । शेषात्कर्तरि परस्मैपदम्' इति सूत्रेण परस्मैपदित्वं च । कतिपयानां धातूनाम् उभयपदित्वमपि सिद्ध्यति। तथापि सामान्यतया

1.आत्मनेपदिनः अनुदात्तेतः भवन्ति । यथा एध वृद्धौ, स्पर्ध सङ्घर्षे, अय गतौ इत्येवम्। अत्र एध इत्यत्र धकारात्परस्य, स्पर्ध इत्यत्र धकारात्परस्य, अय इत्यत्र यकारात्परस्य अकारस्य अनुदात्तेत्वात् आत्मनेपदित्वम्।

2.परस्मैपदिनः उदात्तेतः भवन्ति। यथा अत सातत्यगमने, अड उद्यमे, गडि वदनैकदेशे इत्येवम्। अत्र अत इत्यत्र तकारात्परः अकारः, अड इत्यत्र डकारात्परः अकारः,गडि इत्यत्र डकारात्परः इकारश्च उदात्तेतः भवन्ति। अतः परस्मैपदित्वम्।

3. उभयपदिनः स्वरेतेतः भवन्ति । यथा हिक्क अव्यक्ते शब्दे, टु याचृ याञ्चायाम्, कत्र शैथिल्ये इत्येवम्। अत्र हक्क इत्यत्र द्वितीयककारात्परः अकारः, टु याचृ इत्यत्र चकारात्परः ऋकारः, कत्र इत्यत्र वर्तमानः अकारश्च स्वरितेतः भवन्ति। अतः उभयपदित्वम्।

किन्तु उपसर्गवशात् अर्थविशेषनिमित्तात् च क्वचित् परस्मैपदिनः आत्मनेपदित्वम्, आत्मनेपदिनः परस्मैपदित्वं च लभते।

## 4.3.2.सकर्मकाकर्मकव्यवस्था

कर्मसम्बद्धम् अनुलक्ष्य धातवः सकर्मकाकर्मकत्वेन द्विधा । फलव्यापारयोः समानाधिकरण्यं यत्र, तत्र अकर्मकत्वम्। फलव्यापारयोः वैयधिकरण्ये सकर्मकत्वम् । किन्तु अर्थभेदेन उपसर्गसामीप्येन वा सकर्मकम् अकर्मकं वा भवितुमर्हति । यथा जि जये अकर्मकः । जि पराभवार्थे सकर्मकः । देवदत्तो जयति इति अकर्मकः । रामः रावणं जयति इत्यत्र सकर्मकः । भू सत्तायाम् इति धातुः अकर्मकः। किन्तु सुखमनुभवति 'इत्यत्र उपसर्गसामीप्यात् सकर्मकः ।

## 4.3.3.दशगणाः

पाणिनिना धातवः दशसु गणेषु विभक्ताः । प्रथमादिनाम्ना एते गणाः निर्दिश्यन्ते । प्रतिगणं विकरण- प्रत्ययः वर्तते । गणनामानि प्रथमः धातुः, लटि प्रथमपुरुषैकवचनरूपं विकरणप्रत्ययविधायकं सूत्रं, विकरणप्रत्ययं च अधो निर्दिशति।

| संख्या | गणनामानि | प्रथमः धातुः | धातोः प्र.पु.ए.व | विकरणप्रत्ययविधायकं सूत्रम् | विकरण प्रत्ययः |
|---|---|---|---|---|---|
| 1 | भ्वादिः | भू सत्तायाम् | भवति | कर्तरि शप् | शप् (अ) |
| 2 | अदादिः | अद - भक्षणे | अत्ति | अदिप्रभृतिभ्यः शपः | शपः लुक्(-) |
| 3 | जुहोत्यादिः | हु दानादानयोः | जुहोति | जुहित्यादिभ्यः श्लुः | श्लुः लोपः(-) |
| 4 | दिवादिः | दिवु क्रीडादिषु | दीव्यति | दिनादिभ्यः श्यन् | श्यन्(य) |
| 5 | स्वादिः | षुञ् अभिषवे | सुनोति | स्वादिभ्यः श्लुः | श्नु (नु) |
| 6 | तुदादिः | तुद व्यथने | तुदति | तुदादिभ्यः शः | श (अ) |
| 7 | रुधादिः | रुधिर् आवरणे | रुणद्धि | रुधादिभ्यः श्नम् | श्न (न) |
| 8 | तनादिः | तनु विस्तारे | तनोति | तदादिकृञ्भ्यः उः | उ(उ) |

| | | | | | |
|---|---|---|---|---|---|
| 9 | क्रयादिः | डुक्रीञ् द्रव्यविनिमये | क्रीणाति | क्रयादिभ्यः श्ना | श्ना (ना) |
| 10 | चुरादिः | चुर स्तेये | चोरयति | चुरादिभ्यः णिच् | णिच् (आय) |

## 4.3.4.दश लकाराः

दश लकाराः । लट् लिट् लुट् लृट् लेट् लोट् लङ्, लिङ् लुङ् लृङ् चेति । एतेषु पञ्चमः लेट् वेदमात्रगोचरः । लिङ् द्विधा - विधिलिङ्-आशिर्लिंङ्-चेति । तथा च लोकेऽपि दशलकाराः ।

1.लट् - वर्तमानकाले । वर्तमाने लट् इति सूत्रम् । यथा रामः गच्छति ।

2.लिट् - भूतानद्यतार्थवृत्तेः धातोः लिट् स्यात् । परोक्षे लिट् इति सूत्रम् । यथा रामः बभूव ।

3.लुट् – भविष्यति अनद्यतने अर्थे लुट् स्यात् । अनद्यतने लुट् इति सूत्रम् । यथा अहं श्वः गन्तास्मि ।

4.लृट् -भविष्यत्सामान्ये अर्थे धातोः लृट् स्यात् । लृट् शेषे च इति सूत्रम् ।यथा अहम् अद्य सायं गमिष्यामि ।

5.लोट् - विद्ध्यादिषु अर्थेषु आशिषि च लोट् स्यात् । लोट् च, आशिषि लिङ्लोटौ इति सूत्राभ्याम् । उदा – भवान् गच्छतु ।

6.लङ् - अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात् । अनद्यतने लङ् इति सूत्रम् । उदा – ह्यः सः नगरम् अगच्छत् ।

7.विधिलिङ् - विध्यादौ लिङ् । विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् । उदा – भवान् वस्त्रं क्षालयेत् ।

8.आशीर्लिङ् - आशीरर्थे लिङ् स्यात् । आशिषि लिङ्लोटौ इति सूत्रम् । आशंसनम् आशीः । उदा – शुभं ते भूयात् ।

9. लुङ् – भूतार्थवृत्तेः धातोः लुङ् स्यात् । लुङ् इति सूत्रम् । उदा- कार्यम् अभूत् ।

10. लृङ् – हेतुहेतुमद्भावादिलिङ्निमित्ते भविष्यति काले क्रियातिपत्तौ सत्यां लृङ् स्यात् । उदा – सुवृष्टिः चेदभविष्यत् तदा सुभिक्षमभविष्यत् ।

## 4.3.5.तिङ्प्रत्ययाः

अष्टादश तिङ्प्रत्ययाः । ते तिप् तस् झि, सिप् थस् थ, मिप् वस्, मस् । त, आताम्, झ, थास्, आथाम्, ध्वम्, इड्, वहि, महिङ् च । एतेषु प्रथमे त्रयः त्रिकाः परस्मैपदसंज्ञाः अनन्तरं स्थिताः त्रयः त्रिकाः आत्मनेपदसंज्ञाः ।

## 4.3.6.ऐयून् लाब्स् आप्प्

संस्कृते वर्तमानानां प्रायेण सर्वेषां धातूनां रूपाणि सविस्तरं सूचयति। अस्मिन् २१८० (2180) धातवः तेषां अर्थाः, आङ्गलभाषायामर्थः, कः गणः इत्यादीनि विशदयन्ती धातुरूपमञ्जरी वर्तते। अपि च भारतस्य विविधशिल्पासु वर्तमानाः सूचनाः च सूचयन्तं क्रियाप्रयोगविभागः वर्तते।

धातुरूपमञ्जर्याः एकस्य धातोः कार्यं एवं विशदयति । यथा जुर् जूर्यते - वयोहानौ, हिंसायाम्।

जूरीम् – to kill, to torture, to become old.

गणः दिवादिः । पदम् आत्मनेपदम् । कर्मकः संकर्मकः ।

लट्लकारे – जूर्यते - जूर्येते - जूर्यन्ते इत्यादि ।

लिट् लकारे - जुजूरे - जुजूराते - जुजूरिरे – इत्यादि।

लुट् लकारे – जूरिता जूरितारौ – जूरितारः इत्यादिः।

लृट् लकारे – जूरिष्यते – जूरिष्येते – जूरिष्यन्ते इत्यादि।

लोट्लकारे - जूर्यताम् - जूर्येताम् - जूर्यन्ताम् इत्यादि।

लङ्लकारे - अजूर्यत - अजूर्येताम् - अजूर्यन्त इत्यादि।

आशिर्लिङि – जूरिषीष्ट – जूरिषीयास्ताम् – जूरिषीरन् इत्यादि।

विधिलिङि- जूर्येत -जूर्येयाताम् – जूर्येरन् इत्यादि।

लुङ्लकारे – अजूरिष्ट- अजूरिषाताम्- अजूरिषत इत्यादि।

लृङ्लकारे - अजूरिष्यत – अजूरिष्येताम् - अजूरिष्यन्त इति ।

इत्येवं रूपेण सर्वेषां २१८० धातूनां सर्वेषु लकारेपु - वर्तमानानि रूपाणि प्रदर्शयति ।

छात्रेभ्यः अस्य आप्पः प्रयोजनं सीमातीतमेव । अस्य आप्पि वर्तमानपरं भागं भवति क्रियाप्रयोगः। अस्मिन् भागे वर्तमानं कार्यं विज्ञानप्रदं भवति। अस्मिन् भागे क्रियाः, आङ्गलभाषायामर्थः, तादृशानि पदानि, वर्तमानान् श्लोकांशान् ,ते श्लोकाः कस्मात् उद्धृताः इत्यादि रूपाणि विशदयति। यथा अनुज्ञा इति पदं परिशोधयामः। ( प्रायेण सर्वाणि पदानि उपसर्गसहितानि भवन्ति।

Verb-अनुज्ञा।

Meaning - to allow, to all one to depart, to authorize, to behave kindly, bid farewell to, to consent, to dismiss, to entreat, to excuse, to forgive, to grant,to permit

अनुजानामि - त्वां नाहम् अनुजानामि न गन्तव्यम् इतो वनम्। (रामायणे)

अनुजानाति - ब्रह्माणं कर्मणि कर्मण्य् आमन्त्रयत्य् अपस् तेनानुजानात्य् एषो ह्य् अस्य भागस् तद् (गोपथब्राह्मणम्)

अनुजानीमः - अद्य ताम् अनुजानीमो भीष्मद्रोणवधेन च ।। (महाभारतम्)
अनुजानीयात् -आचान्तांश् चानुजानीयात् अभितो रम्यताम् (मनुस्मृतिः)
अनुजानीहि - स्थानं त्व् इहाजुजानीहि प्रजानां मम च प्रभो। (भागवतपुराणम्)
अनुजानीत - अनुजानीत मां सर्वे गृहान् गच्छन्तु वानराः। (रामायणम्)
अनुजानन्तु – भवन्तऽप्यनुजानन्तु पुरू राज्येऽभिषिच्यते ।। (लिङ्गपुराणम्)
अन्वजानात् -दुहितुस् तम् अभिप्रायम् अन्वजानाच्च पार्थिवः ॥ (महाभारतम्)
अन्वजायन्त – अस्त्रैश्चाप्यन्वजायन्त संग्रामविनयेन च ॥ (महाभारतम्)
अनुज्ञास्यति- अनुज्ञास्यति नो राजा चोदयिष्यति चाप्लुत। (महाभारतम्)
अनुजज्ञे - अथवा अत्यग्निष्व् अपि
वसामज्जानान् अनुजज्ञे
अपवादवाक्यत्वाद् अस्येति
व्याख्येयम् (सर्वङ्गसुन्दरा)
अनुजानातु -उषिताः स्मेह वसतिम् अनुजानातु नो भवान्।(रामायणम्)

अनुज्ञायते - न चोत्सर्गस्यापवादान् निवृत्तिर् इत्येकभविकः कर्माशयोऽनुज्ञायत इति ।
(योगसूत्रभाष्यम्)
अनुजानन्त् - भवतापि श्रुतिस्मृत्योः प्रामाण्यम् अनुजानता। (बृहत्कथाश्लोकसंग्रहः)
अनुज्ञात - अग्नौ कुर्याद् अनुज्ञातो ब्राह्मणो ब्राह्मणैः सह । (मनुस्मृतिः)
अनुज्ञातवन्त् - अनुज्ञातवती तस्य गमनं कुन्दमालिका । (बृहत्कथाश्लोकसंग्रहः)
अनुज्ञातव्यः-युवतिजनानुकूलः पश्चिमो विधिरनुज्ञातव्यः इति (दशकुमारचरितम्)
अनुज्ञातुम् – ईदृशं शक्रहन्तारं त्वम् अनुज्ञातुम् अर्हसि । (रामायणम्)
अनुज्ञाय - अनुज्ञाय सुमन्त्रं च सबलं चैव तं गुहम्। (रामायणम्)
एवं त्रिंशत् सहस्राणां पदानां रूपनिष्पत्तिः अत्र सन्ति।

## 4.3.7.षट्रूपमाला -आप्प् (संस्कृतं सरलरूपेण पठनाय साहाय्यकमाप्प्)

अस्मिन् आप्पि षड्भागाः सन्ति । अक्षराणि, पदानि, व्याकरणं, भाषणं, वाचनं, लेखनं च भवन्ति ते। अक्षरविभागे स्वराक्षराणि व्यञ्जनानि च सन्ति । व्यञ्जनाक्षरेषु संयुक्ताक्षराणि क्ष त्र ज्ञ, श्र च अन्तर्भवन्ति । पदविभागे फलानां, मृगाणां च नामानि, प्रकृतौ वर्तमानानि पर्णं, पुष्पम्, उद्यानं, इत्यादीनि छात्रसम्बद्धानि स्यूतपुस्तकलेखन्यादीनि बालकः - बालिका, पुरुषः-स्त्री, स्नेहितः- स्नेहिता इत्यादीनि विपरीतलिङ्गपदानि, शरीरावयवाः विविधवर्णाः, संख्यापदानि, छत्रम्, उपनेत्रं, करदीपः इत्यादीनि गृहोपकरणानि, विविधवाहनानि, वासराणां नामानि, वामतः, दक्षिणतः, पुरतः, इत्यादीनि पदानि, भक्षणस्य नामानि चान्तर्भवन्ति ।

व्याकरणविभागे क्रिया-विशेषण- सर्वनाम-प्रश्नवाचक -वचनद्योतक पदानि अन्तर्भवन्ति । अपि च कालवाचकपदानि-विभक्तिरूपाणि च सन्ति । यदा - तदा, यदि- तर्हि, यथा-तथा, यद्यपि-तथापि, यत्र-तत्र इत्यादीनि पदानि, तान्युपयुज्य वाक्यनिर्माणं च कृतमस्ति। शिष्टाचाराः कथं कर्तव्यं इति पाठनाय नमस्ते, स्वागतं, सुप्रभातं, शुभरात्रिः, अभिनन्दनानि इत्यादीनां पदानां प्रयोगाः सुष्ठु सूचिताः। सर्वाण्यपि कार्याणि चित्रानुसारमेव सूचितानि इत्यतः बालेभ्योऽपि उपकारप्रदं भवतीदं आप्प् । भाषणपरिशीलनाय प्रश्नाः सूचिताः । तत्र आङ्गलमाषाप्रयोगोऽपि वर्तते ।वाचनविभागे प्राथमिकानि वाक्यानि द्विवचनबहुवचनवाक्यानि लघुकथाश्च सन्ति । लेखनविभागे प्रश्नानामुत्तरलेखनाय पर्याप्तं परिचयं दातुं योग्यानि वाक्यानि सन्ति। प्रहेलिकाप्रश्नाः, तेषामुत्तरलेखनाय चावसरः वर्तते।

यथा – अहं जले वसामि। अहं कः? -

अहं रक्तं पिबामि । अहं कः? -

अहं गणेशस्य वाहनं अस्मि। अहं कः? -

अहं वनस्य राजा । अहं कः? -

एवं षड्रूपमाला आप्प् अतीव ललितं हृद्यं विज्ञानदायकं च भवति। स्वयमेव पठनाय साध्यमेव भाषायां व्युत्पत्तिं सम्पादितुमिदम् आप्प् बहूपकारकं भवति।

## पुनरावृत्तिः (Recap)

- पाणिनिना धातुपाठे प्रायः द्विसहस्रं धातवः उपदिष्टाः ।
- आशयस्य पूर्णता क्रियया सिद्ध्यति।
- परस्मैपदिनः उदात्तेतः भवन्ति ।
- आत्मनेपदिनः अनुदात्तेतः भवन्ति ।
- उभयपदिनः स्वरितेतः भवन्ति ।
- दश लकाराः ।
- अष्टादश तिङ्प्रत्ययेषु प्रथमाः नव परस्मैपदिनः, अवशिष्टाः नव आत्मनेपदिनः च भवन्ति ।
- ऐयून् लाब्स् आप्पि धातुमञ्जरी क्रियाप्रयोगः इति भागद्वयमस्ति।
- संस्कृतं सरलरूपेण पठनाय साहाय्यकमाप् भवति षट्रूपमाला आप्प।
- अस्मिन् आप्पि षड् भागाः सन्ति ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'भूवादयो धातवः' इति सूत्रस्य कोऽर्थः?

2. धातुरूपनन्दिनी इत्यस्मिन् पुस्तके कति धातवः सूचिताः ?
3. स्वरितेत् वर्तते चेत् परस्मैपदम् आत्मनेपदं वा?
4. कस्मिन् आप्पि २१८० धातवः सूचिताः?
5. वयोहानौ हिंसायां च इत्यर्थे वर्तमानः धातुः कः ?
6. अनुजानामि 'इति पदस्यार्थः कः ?
7. कति पदानां रूपनिष्पत्तिः ऐयून् लाब्स् आप्पि वर्तते ?
8. षट्रूपमाला-आप्पि प्रथमे विभागे कानि विस्तारयति ?
9. अहं वनस्य राजा । अहं कः ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत।

(Answer the following questions in one or two sentences)

1.कति लकाराः भवन्ति ? ते च के ?
2. के परस्मैपदधातवः ?

## एकैकया खण्डिकया उत्तराणि लिखत।

(Answer the following questions in a paragraph)

1. धातोः सकर्मकाकर्मकव्यवस्था ।
2. भूतकाले प्रयुज्यमानाः लकाराः।

## निर्दिष्टाभ्यासः (Assignment)

1. ऐयून् लाब्स् आप्पि वर्तमानं कमपि धातुं संसूच्य तस्य दशलकारेषु एकैकं रूपं लिखत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि(Answer to Objective type questions)

1.क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।
2.१६८८ ।
3.उभयपदमेव सिद्ध्यति।

4.ऐयून लाब्स् आप्पि ।
5.जुर् जूर्यते।
6.अनुवादं ददामि ।
7.त्रिंशत् सहस्राणाम्।
8.अक्षराणि ।
9.सिंहः।

## सूचनाग्रन्थाः


1.जनार्दन हेग़डे, धातुरूपनन्दनी, संस्कृतभारती, नवदिल्ली, 2020
2. AleunLabs Sanskred Dhatu 360$^0$ deg in internet.
3. App संस्कृतम् in internet

# Unit-4

## सङ्गणकाधारिताः लेखागाराः

### उद्देश्यानि (Learning outcomes)

- संस्कृतम् अनायासेन पठितुं प्रभवति ।
- संङ्कणकधारिताः संस्कृतपठनसन्नाहान् जानाति ।
- संस्कृते वर्तमानान्e-books आप्पः प्रवर्तनानि अवगच्छति ।
- संस्कृतपुस्तकालयानां पठनेन संस्कृते भाषितुं वैदग्ध्यं सिद्ध्यति ।

### प्राग्व्यपेक्षाः (Pre requisites)

आर्षसंस्कारवाहिनी संस्कृतभाषा अतिपुरातना सत्यपि आधुनिकोपकरणानां साहाय्येन पठनाय पाठनाय च योग्या सरला भाषा भवति । अमरकोशादीनाम् आधिकारिकग्रन्थानां हृदयस्थीकरणं पूर्वं निर्बन्धरूपेण आसीत्। इदानीं करतलामलकम् इव अमरकोश- आप् वर्तते इत्यतः श्लोकानां कण्ठस्थीकरणस्यावश्यकता नास्ति । दैनन्दिनजीविते विद्यालयेषु कलाशालासु प्रतिगृहं च संस्कृतभाषायाः प्रयोगात् मातृभाषा इव संस्कृतं प्रायेण सर्वत्र प्रयुज्यते । संस्कृत-पुस्तकालयः (इदमाप्प् e आप्भवति) इत्यस्य उपयोगेन संस्कृतभाषायाः सर्वे विभागाः अस्य आप्पः साहाय्येन पठितुं प्रयोक्तुं च शक्यते। पुस्तकानि विहाय पुस्तकस्थानि कार्याणि अस्मिन् सन्ति, तानि पठितुं निरीक्षितुं शक्यते।

अस्मिन्नेकके सङ्गणकाधारिताः लेखागारान् पठितुं परिशोधयितुमवसारः लभते । अनेकानि पुस्तकानि - काव्यनाटकादीनि सन्ति । अन्तर्जालद्वारा सर्वान् ग्रन्थान् परिशोधयितुं शक्यते इत्येतत् महद्भाग्यमेव । अस्मिन्नेव एकके Internet archive (अन्तजाल : लेखागारः) वर्तते। तस्मिन्पञ्चाशतधिकानां ग्रन्थानां सूचनाः सन्ति । विज्ञानभाण्डागाररूपेण वर्तमानं एतत्द्वयमधिकृत्यपठामः ।

### प्रधानांशाः/ प्रधानपदानि(Key words)

विज्ञानभाण्डागारः - विज्ञानमेकत्र केन्द्रीकृतम् – सर्वमनुभवात् ज्ञायते इत्यस्य विपरीतः - शतकात्पूर्वं संभूतं- स्वदृष्टमिव - पुस्तकसम्पादने प्रयासः - मूल्यवर्धना-संरक्षणप्रयासः - परिहारमार्गाः - ई पुस्तकालयः-मम पुस्तकालयः - डा. जगदानन्द झा निर्माता- सुमन झा -

सर्वे विषयाः- आयुर्वेद-इतिहास-उपनिषद्-काव्य-काव्यशास्त्र- ज्योतिषादिविषया - आयुर्वेद अष्टाङ्गहृदयादि ग्रन्थाः- राजतरंगिणी - दशोपनिषदः- भागवतम्- रघुवंश-अलङ्कारसर्वस्वं – काव्यालङ्कारसूत्रवृत्तिः- - व्यक्तिविवेकः- काव्यमीमांसा - रसगङ्गाधरः- अमरकोशः- हलायुधकोशादिः - मानसागरी-सिद्धान्त शिरोमणि - कुलार्णवतन्त्रम् - तांन्त्रिकसाहित्यं-योगिनीहृदयम्-श्रीविद्याकल्पलता – गीतारहस्यम्-तर्कसंग्रहः- योगसिद्धान्तचन्द्रिका-वेदान्तसारः- श्लोकवार्तिकम् – स्यादवादमञ्जरी – याज्ञवल्क्यस्मृतिः-दूतवाक्यं- दशरूपकम् – निघण्डु – न्यायबिन्दुः इत्यादिः।

अन्तर्जाललेखागारे परसहस्रं वेब्पुटानि (webpages) अस्मिन् लेखागारे बहुसहस्रं सौजन्यग्रन्थाः. चलचित्राणि- मृदुतन्तवः(software) संगीतादयः – अमेरिकादेशस्य ग्रन्थशालाः – श्रव्यग्रन्थाः – काव्यानि च सौजन्यलिब्रिवोक्स् (the librivox free) प्रभृतयः अनेके पौराणिक-आधुनिकविषयसम्बन्धाः सन्ति।

## विशदीकरणम् (Discussions)

एकैकः ग्रन्थः एकैकः विज्ञानभाण्डागारः एव। ग्रन्थादेव वयं ज्ञानं आर्जयामः । अनुभवसिद्धं ज्ञानमेव श्रेष्ठं इत्युक्तिः वर्तमानेऽपि सर्वाणि ज्ञानानि अनुभवात् प्राप्तुं न शक्यते।। ग्रन्थेषु अस्माकं सांस्कारिकं चरित्रं सुरक्षितत्वेन संरक्षितमेव। आचार्याणाम् ऋषीश्वराणां च प्रतिभायाम् उद्भूतं ज्ञानं एकत्र सञ्चितं भवति । तादृशः विज्ञानसञ्चयः भवति ग्रन्थः । पुस्तकालयः यथार्थतः सर्वविज्ञानकोशानां आलयः एव। गृह्णाति धान्यादिकमिति गृहम्। तद्वत् सर्वेषां विज्ञानानां अक्षया खनिः भवति पुस्तकालयः । पुस्तकस्थं विज्ञानमेव छात्राः पठन्ति। अध्यापकाः ग्रन्थान् परिशील्य पाठयन्ति। अतः पुस्तकं अस्माकं जीवने समुन्नतं स्थानं वहति। सङ्गणकधारिताः पाठाः तथा ई-पुस्तकालयः च सन्ति। सङ्कणकयुगे अस्मिन् पुस्तकसंरक्षणे यः प्रयासः अनुभूयते - मूल्यवर्धना, भारं, रक्षणादयः ई पुस्तकालये न। हस्ते वर्तमाने चलनभाषणयन्त्रे (In mobile phone) एतत्सर्वं सुरक्षितं भवति । चलनभाषणयन्त्रे अनेकान् विषयान् संरक्षितुं सौविधानमस्ति । तेषां मध्ये ई-पुस्तकालयः 'अस्ति चेत् महान् लाभः वर्तते।

## ई-पुस्तकालयः

ई-पुस्तकालये के के सन्ति? सर्वमप्यस्ति । 'मम पुस्तकालयः नामकः आप् वर्तते । पठन्तु पी.डी.एफ्. पुस्तकानि इति सूचना । अस्य निर्माता सुजन झा भवति । संविधायकः डा. जगदानन्द झा महाशयः । तस्मिन् षड्त्रिंशत् विभागेषु अन्तर्भूतान् अनेकान् ग्रन्यानधिकृत्य विवरणमस्ति । आयुर्वेदविषये अष्टाङ्गहृदय-हस्त्यायुर्वेद -चरकसंहिता-नाडीपरीक्षा (हिन्दीटीकासहित:) सूचिताः_। प्रतिपुस्तकं पुस्तकस्य नाम, लेखकस्य नाम,

टीकायाः (टीकाकारस्य) नाम, विषयः इत्याद्याः सन्ति। इतिहासविषये पाणिनिकालीनभारतम्, भारतीयलिपिशास्त्रम्, राजतरङ्गिणीनामकं ग्रन्थं 'चाधिकृत्य विवृणोति । उपनिषद्विषये दशोपनिषदः सूचिताः । कर्मकाण्डविभागे त्रयः ग्रन्थाः सूचिताः । ते नित्यकर्मपूजाप्रकाशः, आह्निकसूत्रावली, विधिविवेकः च भवन्ति। कल्याणविभागे उपनिषद अङ्कः, भागवत अङ्कः, शक्ति अङ्कः, शिव अङ्कः चान्तर्भवन्ति। काव्यविभागे रघुवंशमहाकाव्यं वर्तते। तस्य लेखकः पण्डित ब्रह्मशङ्करमिश्रः भवति। काव्यशास्त्रविषये अनेके ग्रन्थाः सन्ति। तेषु रुय्यकस्य हरचरितचिन्तामणिः, रुय्यकस्य अलङ्कारसर्वस्वम्, क्षेमेन्द्रस्य औचित्यविचारचर्चा, भामहस्य काव्यालङ्कारः, रुद्रटस्य काव्यालङ्कारः, वामनस्य काव्यालङ्कारसूत्रवृतिः, अप्पय्यदीक्षितस्य कुवलयानन्दः चित्रमीमांसा च, कुन्तकस्य वक्रोक्तिजीवितम्, महिमभट्टस्य व्यक्तिविवेकः, भोजस्य श्रृङ्गारप्रकाशः, सरस्वती कण्ठाभरणं च मम्मटस्य काव्यप्रकाशः, जयदेवस्य चन्द्रालोकः, आनन्दवर्धनस्य ध्वन्यालोकः, विश्वनाथस्य साहित्यदर्पणः इत्यादयः अन्तर्भवन्ति। कोशसम्बन्धिनःग्रन्थाः-अमरसिंहस्य अमरकोशः, मेदिनीकोशः शब्दार्थचिन्तामणिः, हलायुधकोशादिः सन्ति । ज्योतिषे मानसागरी, सिद्धान्तशिरोमणिः, फलदीपिका, मुहूर्तचिन्तामणिः इत्यादयः: वर्तन्ते । तन्त्रे तु कुलार्णवतन्त्रम्, तान्त्रिकसाहित्यम्, मन्त्रमहोदधिः, योगिनीहृदयम्, श्रीविद्याकल्पलता इत्यादयः सन्ति। दर्शनग्रन्थेषु गीतारहस्यम्, तर्कसंग्रहः, न्यायवार्तिकम्, योगसिद्धान्तचन्द्रिका, वेदान्तसारः, श्लोकवार्तिकं, स्यादवादमञ्जरी, इत्यादयः ग्रन्थाः अन्तर्भवन्ति । धर्मशास्त्रग्रन्थेषु मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, विदुरनीतिः इत्यादयः ग्रन्थाः सन्ति । नाटके अभिज्ञानशाकुन्तलम्,विक्रमोर्वशीयम्, भवभूतेः उत्तररामचरितम्, भासस्य दूतवाक्यम्, श्रीहर्षस्य नागानन्दम्, रत्नावली च, विशाखदत्तस्य मुद्राराक्षसम्, शूद्रकस्य मृच्छकटिकम्, भट्टनारायणस्य वेणीसंहारम्, इत्यादीनि रूपकाणि अन्तर्भवन्ति । नाट्यशास्त्रविषये धनञ्जयस्य दशरूपकम्, निरुक्तकारस्य यास्कस्य निघण्टुः, न्याये सतीशचन्द्रस्य न्यायबिन्दुः, पुराणविषये अग्निपुराणम्, प्राकृतभाषायां गौढवहः,भाषाविज्ञाने संस्कृतभाषाविज्ञानम् च अन्तर्भवन्ति। व्याकरणविषये अनेके ग्रन्थाः । तेषु पाणिनेः अष्टाध्यायी, जयादित्यवामनयोः काशिकावृत्तिः, पतञ्जलेः महाभाष्यम्, भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी, प्रौढमनोरमा च, नागेशभट्टस्य परिभाषेन्दुशेखरः, वरदराजस्य मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी च भर्तृहरेः वाक्यपदीयम्, सुरेश झा प्रणीता श्लोकसिद्धान्तकौमुदी इत्यनेके व्याकरणग्रन्थाः सूचिताः । संस्कृतिविभागे बहवः ग्रन्थाः अन्तर्भूताः । कालिदासस्य ऋतुसंहारः रघुवंशः च, अश्वघोषस्य बुद्धचरितम्,सौन्दर्यानन्दम्च भट्टिनः भट्टिकाव्यम्, बिल्हणस्य विक्रमाङ्कदेवचरितम् भासस्य स्वप्नवासवदतम् इत्यादीनां ग्रन्थानां सूचनाः सन्ति । अपि लेखकेन एस्.वि. राधाकृष्णशास्त्रिणा रचितः आनन्दकन्दम् इति ग्रन्थस्य सूचनास्ति।

सुभाषितविभागे काशीनाथशर्मणा नारायणरामाचार्येण च लिखितः सुभाषितरत्नभाण्डागारः नितरां प्रसिद्धः। स्तोत्रविषये अभिनवस्तोत्रावली, सूर्यशतकम्, सौन्दर्यलहरी इत्यादीनां ग्रन्थानां सूचनाः प्रदर्शिताः। विपुलाः भवन्ति ई पुस्तकालयस्य ग्रन्थतल्लजम्।

## अन्तर्जालसंग्रहालयः(Internet archive)

अन्तर्जालसंग्रहालये अनेकसहस्रम् ग्रन्थानां संग्राहलायः भवति। पौराणिकाः, प्रायेण सर्वविषयसम्बद्धाः सर्वभाषासम्बद्धाः ग्रन्थाः सन्ति, ते निश्शुल्कं ग्रहीतुं पठितुं च शक्यते। न केवलं ग्रन्थाः किन्तु चलचित्राणि, संगीतानि, तन्त्रांशाः (softwares), जालपुटानि (websites) प्रभृतीनि सन्ति।

अन्तर्जालसंग्रहालये वर्तमानानां कतिपयानां लघुविवरणमधो दीयते।

( i ) अमेरिकादेशस्य ग्रन्यालयाः- अमेरिकादेशस्य विविधभागात् सञ्चितानां समाहारः अत्रास्ति। ग्रन्थशालानां चरित्रं, प्रादेशिकग्रन्थशालाः, तत्रत्यानां जनानां जीवितरीतिं सूचयन्तः ग्रन्थाः, प्रशस्तिं प्राप्तानां पण्डितानां विवरणानि च दत्तानि। संचयनस्य प्रधानभागाः सूचयन् तन्त्रांशः Microsoft. Yahoo!, the Sloan Foundation, and others भवति ।

(2) **श्रव्यपुस्तकानि पद्यानि च** (Audio books and poetry) श्रव्यपुस्तकानां तथा तेषां डिजिट्टल्शेखराणां च काचन अक्षयानिधिरियम्। नरोपाकाव्यशास्त्रदृश्यसंग्रहालयात् प्राप्ताः इयं निधिः सहृदयान् सन्तोषयति। (Naropa Poetics Audio Archive, Libri Vose, Project Gutenberg, Maria Lective)

(3) **अतिरिक्ताः संग्रहः** (Additional Collections) - इत्यस्मिन् भागे द्विकोट्यधिकाः विभवाः सन्ति । तेषु शास्त्रग्रन्थालयाः, शास्त्रसंभावनाः, अमेरिकायाः न्यायालयप्रमाणानां पुनरावृत्तयः, इस्लामिकपठनानि तथा संस्कृतिसञ्चयः, हास्यग्रन्थाः नोबल्स् च अन्तर्भवन्ति।

(4) **APK संग्रहालयः** – अस्मिन् प्रायः दशसहस्रं विभवाः सन्ति। अस्मिन् चलचित्रसम्बन्धि, पृष्टभूमि आप्प् (Background App) नोवा दूरदर्शनं, लोक्लोक् नवीनतमः संस्करणं टि वि माट्ट् (+ टूबि. सौजन्यचित्राणि दूरदर्शनम् इत्याद्यनेकाः विभवाः सन्ति ।

(5) **सजीवसंगीतसंग्रहालायः** (Live Music Archive) - अस्मिन् द्विसहस्राधिकाः विभवाः सन्ति। । अस्मिन् अनेकानि आप्पः सन्ति। तेषु कृतज्ञः मृतः (greatful dead, जोयी रुस्सोः प्रायः मृतः: (Joe Russo's Almost dead). फिल्लेस् मित्राणि च (Phil Lear and friends), बिल्ली स्त्रिन्ग् (Billy stringo), तारादधिकसंभवः (string cheese incident) कनिष्ठपर्वतताराबान्द (on yonder mountain String band), डिस्को बिसुल्ट (Disco Biscuits) प्रकृती इत्यादीनि अन्तर्भवन्ति।

(6) **कनेडियादेशस्थग्रन्थशाला** (Canadian Libraries) अस्मिन् लेखागारे अनेके विभवाः सन्ति। दोरन्टोसर्वकलाशालायाः यन्त्रग्रन्थशाला, अल्बर्टसर्वकलाशाला, ओट्टावा सर्वकलाशाला, विक्टोरियायाः सर्वकलाशालायाः ग्रन्थशालासञ्चयः, विक्टोरिया सर्वकलाशालाग्रन्थालयाः, कनेडिया सर्वकारीयप्रसिद्धीकरण आप्प्, तोमस् फिषरः विरलपुस्तक ग्रन्थालयः इत्यादीनि अन्तर्भवन्ति ।

(7)**कलाः संगीतं च** (Arts and Music) अस्मिन् आप्पि बहवः विभवाः सन्ति। तेषु वैद्युति-अजः (Electric Sheep), मनोदशा संगीतदृश्यम्(mood music video), वि. एल् लूपस्य कलाप्रवृत्तयः (Vi's loops and performance), गच्छनः समुदायसंगीतसंग्रहालयः (GET chen community Music archive) पूबोट्चित्राणि (Pooh Bot pictures), रोटिका पुतली च (Bread and puppet), विध्वंसपाकशालादृश्यम् (Demolition Kitchen, Video) इत्यनेके आप्पः सन्ति ।

एवम् अस्मिन् लेखागारे सीमातीताः विभवाः सन्ति । एषां सम्पर्केण संस्कृतभाषापठनं सुकरं ललितं च भवति । सङ्गणकाधारिताः पठनक्रमाः अद्भुतावहा प्रोन्नतिः पठनपाठनमण्डलेषु जनयति ।

## पुनरावृत्तिः (Recap)

- अमरकोशश्लोकानां कण्ठस्थीकरणाय इदानीमावश्यकता न वर्तते, करतलामकमिव पदानि अमरकोश-आप्पि वर्तन्ते ।
- ई-पुस्तकालये सर्वान् विषमानधिकृत्य विवरणानि सन्ति ।
- तान्त्रिकविद्यायां कुलार्णवतन्त्रं मन्त्रमहोदधिः योगिनीहृदयम् इत्यादीनि ई ग्रन्थाः सन्ति।
- अस्माकं हस्ते वर्तमाने चलनभाषायन्त्रे(Phone) अनेकान् विषयान् संरक्षितुं संविधानम् अस्ति।
- भारते ई-पुस्तकालयस्य निर्मातृषु अन्यतमःभवति सुजन झा महाशयः ।
- आयुर्वेदविषये अष्टाङ्गहृदय-हस्त्ययुर्वेद-चरकसंहितादयः सन्ति।
- कर्मकाण्डविषये त्रयः ग्रन्थाः सूचिताः ।
- ज्योतिषे मानसागरी, सिद्धान्तशिरोमणिः, फलदीपिका, मुहूर्तचिन्तामणिः इत्यादयः ग्रन्थाः वर्तन्ते ।
- विपुलं भवति ई पुस्तकालयस्य ग्रन्थतल्लजम्।
- अन्तर्जालसंग्रहालये अन्यतमः भवति सजीवसंगीतसंग्रहालयः (Live Music Archive)

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. प्रायः सर्वेषां ग्रन्थानां सूचनादायकः आप्प् किम् ?
2. अस्मिन् बहुसहस्रं सौजन्यग्रन्थाः, चलचित्राणि, मृदुतन्तवः, संगीतादयः सन्ति । कस्मिन्?
3. ई-पुस्तकालये कर्मकाण्डविभागे कति ग्रन्थाः सूचिताः?
4. अलङ्कारसर्वस्वम् इति ग्रन्थस्य कर्ता कः ?
5. ई.पुस्तकालये 'गीतारहस्यम्' इति ग्रन्थः कास्मिन् विभागे अन्तर्भवति?
6. दूतवाक्यस्य कर्ता कः?
7. अमेरिक्कादेशस्य ग्रन्थालयाः इत्याप्प् कस्मिन् अन्तर्भवति ?
8. रोरन्टो सर्वकलाशालायाः यन्त्रग्रन्थशालाविवरणं कस्मात् लभते ?
9. वैद्युति-अजः (Electric sheep), मनोदशासंगीतदृश्यम् (Mood Music Video) इत्यादयः कस्मिन् आप्पि वर्तते?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

(Answer the following questions in one or two sentences)

1. वयं अधिकानि ज्ञानानि कस्मात् आर्जयामः?
2. ई पुस्तकालये आयुर्वेदविषये के ग्रन्थाः सन्ति ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

(Answer the following questions in a paragraph)

1. 'ई-पुस्तकालयः' इत्याप्पः प्राधान्यम् ।
2. ई-पुस्तकालये साहित्यविभागः ।
3. सजीवसंगीतसंग्रहालयः (Live Music Archive)

## निर्दिष्टाभ्यासः(Assignments)

1. ई-पुस्तकालयः इति आप्पि वर्तमानान् विभवान् संग्रह्य लिखत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि(Answer to Objective type questions)

1. ई-पुस्तकालय- आप्प् ।
2. अन्तर्जाललेखागारे ।
3. त्रयः ।
4. रुय्यकः ।
5. दर्शनविभागे ।
6. भासः ।
7. अन्तर्जालसंग्रहालयः ।
8. कनेडियादेशस्थाग्रन्थशाला' नामकात् आप्पः सकाशात् ।
9. कलाः संगीतं च (Arts and music) नामके आप्पि वर्तते ।

## सूचने

1. मम पुस्तकालयः in internet e-पुस्तकालयः
2. Internet archiv.org - internet archive1

## Model Question Paper (SET – A)

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ......... Reg. No ........................

Name : .....................

SECOND SEMESTER B.A. PROGRAMME (HOUNARS) EXAMINATION

Ability Enhancement Compulsory Course

**SGB24SN101AC – व्यावहारिकसंस्कृतम्**

2024-25 Admission Onwards

**Time: 2 Hours** **Max.Marks:45**

सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।

SECTION - A

(प्रथमो भागः)

**I.एकेन पदेन वाक्येन वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x1=5)**

**(Answer any five questions in a word or sentence)**

1.'इकारः" केन स्थानेनोच्चरति ?

2.वर्णाः कति विधाः सन्ति ?

3.कदा कथाः आविर्भूताः?

4.पञ्चतन्त्रस्य कर्ता कः?

5.वार्तावाचनाय कीदृशी नैपुणी सम्पादनीया ?

6.अमरकोशे 'सूर्यः' इत्यर्थे कति पदानि सन्ति ?

7.प्रायः सर्वेषां ग्रन्थानां सूचनादायकः आप्प् किम् ?

8.भाषापठनस्य द्वितीयं सोपानं किम् ?

## SECTION - B

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5 x 2 = 10)

**(Answer any five questions in one or two sentences)**

9.किम् नाम पदम् ?

10.किम् नाम संस्कृतभाषापरीक्षणशाला ?

11.संस्कृते कति लकाराःसन्ति ? के च ते ?

12.अमरकोश-शब्दकल्पद्रुमयोः आप्पोः पठनेन कः लाभः ?

13.अकार-आकारयोः उच्चारणे कः लाभः ?

14.पदसम्पत्तिं कथं आर्जयितुं शक्यते?

15.अमूर्तकक्षायाः लाभाः के ?

16.स्वयंवाहकविद्यायाः प्रचारणेन के लाभाः सिद्ध्यन्ति ?

## SECTION -C

**(तृतीयो भागः)**

**III. केषाञ्चित् चतुर्प्रश्नानां उत्तराणि लिखत ।** (4 x 5 = 20)

**(Answer any four questions)**

17.विज्ञापनचित्राणां सविशेषताः काः ?

18.भाषापठने सङ्गणकयन्त्रस्य प्राधान्यं विशदयत।

19.अमरकोशः इति आप्पः सविशेषताः काः?

20.कथाश्रवणे श्रद्धेयाः कार्याः संक्षिप्य लिखत।

21.वार्तावाचनशिक्षणस्य प्राधान्यं विशदयत।

22.विज्ञापनचित्राणां सविशेषताः काः ?

## SECTION -D

**(चतुर्थो भागः)**

**IV. केषाञ्चित् एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** (1 x 10=10)

**(Write an essay on any one of the following )**

23.कथायाः महत्त्वं विशदयत।

24.धातोः सकर्मकाकर्मकव्यवस्थां विशदीकुरुत।

SGOU

Model Question Paper (SET – B)

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: .........

Reg. No : ........................

Name: .....................

SECOND SEMESTER B.A. PROGRAMME (HOUNARS) EXAMINATION

Ability Enhancement Compulsory Course

**SGB24SN101AC – व्यावहारिकसंस्कृतम्**

2024-25 Admission Onwards

Time: 2 Hours | Max.Marks:45

सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।

## SECTION A

## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5x1=5)

**(Answer any five Questions in a word or Sentence)**

1. भाषापठनस्य प्रथमं सोपानं किम् ?
2. पदानामुच्चारणाय प्रथमं केषां पठनं कार्यम्?
3. प वर्णस्य उच्चारणस्थानं किम्?
4. पत्रवाचनेन कीदृशी नैपुणी सम्पादनीया ?
5. अनुदिनं प्रसारितं संस्कृतवार्तापत्रम् किम्?
6. आङ्गलभाषातः संस्कृतभाषान्तरीकरणं कुर्वतः आप्पः निर्माता कः?
7. अमरकोशे कति काण्डानि सन्ति ?
8. आशंसाः अर्पयितुं योग्यस्य आप्पः नाम किम् ?

## SECTION -B

## (द्वितीयो भागः)

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5x2=10)

(Answer any five Questions in one or two sentences)

9. पदानां उच्चारणपाठनं कथं कर्तव्यम् ?
10. बालानां पुरतः कथापाठनवसरे किं तत्त्वं स्वीकर्तव्यम् ?
11. आयुर्वेदसंबन्धी कश्चन आप्तवाक्यं किम्?
12. स्पर्शाः के ?
13. संस्कृतभाषायां वार्तावाचनाय किं किं कार्यम् ?
14. तत्त्वम् नाम चानल् माध्यमे किं वर्तन्ते?
15. कथापठने किं किं वर्धते ?
16. समाचारवाचनाय आवश्यकः कः?

## SECTION - C

**(तृतीयो भागः)**

**III. केषाञ्चित् चतुर्प्रश्नानां उत्तराणि लिखत।** (4x5=20)

(Answer any four Questions)

17.कथासु वर्तमानान् गुणान् विशदयत।
18.संस्कृतगानेभ्यः संस्कृतपठनं कथमिति विशदयत।
19.वर्णानां उच्चारणे श्रद्धेयाः के ?
20.पत्रवाचनेन संप्राप्तुं योग्याः लाभाः के ?
21.शब्दकल्पद्रुमः – आप्पः सविशेषताः काः ?
22.अमूर्तकक्ष्यायाः लाभाः काः ?

## SECTION– D

**(चतुर्थो भागः)**

IV. **केषाञ्चित् एकस्य प्रश्नस्य निबन्धात्मकं उत्तरं लिखत।** (1x10=10)

(Write an essay on any one of the following)

23.ई- पुस्तकालयः इति आप्पि वर्तमानान् विभवान् संग्रह्य लिखत।
24.वार्तावाचनशिक्षणस्य प्राधान्यं विशदयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

NO TO DRUGS

# തിരിച്ചിറങ്ങാൻ പ്രയാസമാണ്



ആരോഗ്യ കുടുംബക്ഷേമ വകുപ്പ്, കേരള സർക്കാർ

व्यावहारिकसंस्कृतम्

COURSE CODE: SGB24SN101AC

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-988379-6-7